शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line
मिंमासा	कुकनाथ भट्ट	वेदिक	अपूर्ण	–	3/6	~~88~~ 42	संस्कृत	कागद		

M-2912

श्रीगणेशाय नमः ॥ श्रीगणपतिं इष्टदेवतां प्रणम्य ॥ श्री अंबिकायै नमः ॥ का
रुण्यनिकेतनं रामं सिलापूतापूतं ॥ विश्वामित्रान्विता प्रवलतिसमालं
बरारिवनं वंदे ॥ लक्ष्मीसहायकल्पद्रुमतलरसीतगोकुलं ॥ वर्णाश्रि
उपनस्यम्मम हः किंचिदुपास्महे ॥ वेदार्थं धर्मरक्षार्थं मायान्मानूपकृपि
तं ॥ पितामहं हरिं वंदे भट्टाचार्यगणेश्वं ॥ यत्प्रसादस्मृतिः सर्वमंगल
प्रतिभूर्मता ॥ तातं मद्दत्तमब्द्रमायान् श्रीलालचरणान्नमतः ॥ सर्वकल्प
लसंदेहनिदानपदद्वयं ॥ पंढरीशीदरीसिवामूमारव्यो नौमि सादरं ॥
विठ्ठमाधवपादाब्जं रेलंबिरलविध्रहे ॥ आचांसेभ्यालं रिभट्टदिवाक
रमुपास्महे ॥ हेमाद्रिमाधवमतं प्रविच्चार्य संम्यग्गाच्छलत्वमप्रतिर्थ
वत्तोपरेषां ॥ श्रीरामकृष्णतनयक्रमलाकरादयः कल्येयुस्मामतिनि
निर्णयमालक्षोति ॥ संतियद्यपि विक्रांसस्तान्नि बं धाम्यकोटिशः ॥ न
थाप्यभूष्यवेदाधीकेचिद्विज्ञात्रमिराते ॥ ८ ॥ तत्र संक्षेपतः कालः
षोढा ॥ ६ ॥ अब्दोयममृतुमासः पक्षोदिवसइति ॥ तत्रादौ माधव

नंदनो विजयश्चैव जयो मन्मथदुर्मुखः ॥ हेमलंबी विलंबी चाविरोधी विकृति खरः ॥

मतेपंचधा ॥ सावन सौरश्चांद्रो नाक्षत्रो बार्हस्पत्यइति ॥ एतेषांमध्य
मत्रास्ति भोगेन बार्हस्पत्यः ॥ सच ज्योतिःशास्त्रे प्रसिद्धः ॥ हेमाद्रिसं
ग्रहे धर्मशास्त्रानुपयोगित्वएवाभिधानात् ॥ तत्र वक्ष्यमाणेः सा
वनादिद्वादशमासैस्सावनं वर्षम् ॥ मलमासेतु षष्टिदिनात्मक एको
मासइति द्वादशमासत्वमविरुद्धं ॥ तथाच व्यासः ॥ षष्ट्या तु दि
वसैर्मासः कथितो बादरायणैरिति ॥ तत्र चैत्रादेः षष्टिभेदाः ॥ त
दाह नारदोगर्गश्च ॥ प्रभवो विभवः शुक्लः प्रमोदोथ प्रजापतिः ॥ अं
गिराः श्रीमुखो भावो युवा धातास्तथैवच ॥ ईश्वरो बहुधान्यश्च प्र
माथी विक्रमो वृषः ॥ [illegible] चित्रभानुः सुभानुश्च तारणः पार्थिवो व्य
यः ॥ सर्वजीत्सर्वधारिच विरोधि विकृतिखरः ॥ शुभकृच्छोभनः क्रो २
धि विश्वावसुपराभवः ॥ प्लवंगः कीलकः सौम्य साधारणविरोधि
कृत ॥ परिधाविप्रमाथिच आनंदोराक्षसोनलः ॥ पिंगलः कालयु
क्तश्च सिद्धार्थि [illegible] रौद्रदुर्मतिर्दुंदुभी रुधिरोद्गारि रक्ताक्षि

क्षो धनदस्य युः॥ इति॥ यद्यपि ज्योतिषे गुरोर्मध्यमराशिभोगेन प्रभवा
दीनां माघादौ प्रवृत्तिरुक्ता॥ तथापि प्रभवादीनां चांद्रत्वमप्यस्ति द्रो
चोलंगप्रभवादिनं पंचकेपंचके युगेष्वलिमाघयोगे॥ तेनु चांद्रप्रभ
वादित्रैत्र सितेप्रवर्तते॥ बार्हस्पत्ये तु माघादौ॥ तयोर्विनियोगो ज्यो
तिर्निबंधे ब्रह्मसिद्धांते॥ व्यावहारिकसंज्ञाय कालस्मृत्यादिकर्मसु॥
वर्जयेः सर्वत्रत आपि जेवो बानर्मदोत्तरे॥ भार्षिषेगः॥ स्मरेत्सर्वत्र क
र्मादौ चांद्रं संवत्सरं सदा॥ नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिते
ति॥ ॥अथायनं तु सौरं तत्र यालके॥ सौरं तस्तलि यं मृदिवण पतु
मिति दीपिकोक्ते॥ तद्द्विविधं॥ दक्षिणमुत्तरं चेति॥ कर्कादेमुत्तरेर्वे॥
दक्षिणाङ्गमुत्तरे कुर्वन् तत्फलमवाप्नुयात्॥ वैखानसः॥ मात्रभैरव
चाराहनरसिंहत्रिविक्रमः॥ महिषासुरहंत्र्यश्च स्थाप्या वै दक्षिणा
यने॥ वैखादप्य वै॥ ननु दक्षिणायनएवेति नियमः॥ पूर्ववचने
दक्षिणायने निषीद्धा यादेव प्रतिष्ठायः॥ देवविशेषेप्रतिप्रसवमा

श्चात् ॥ रत्नमालायां ॥ मकरभवेचापि त्रिदिवप्रतिष्ठाविवाहचौलव्रतबंधपूर्वं ॥ सौम्यायनेकर्मशुभं ॥ विधेयंपयक्रीर्हितंनत्खलुदक्षिणेचेति ॥ अस्या
पवादस्कांदे ॥ सदावलयुगंव्याप्यसूत्तरायणे ॥ सदामहोदयन्त्यास्तुका
र्यान्निवसंतोसतां ॥ इत्ययनमयनम् ॥ ॥ अथऋतवः ॥ ऋतूर्मासद्वया
त्मा ॥ मकरमासेतुमासद्वयात्मकः एकोमासस्तेनमासद्वयात्मकत्वमवित
र्हं ॥ सद्वेधा ॥ चांद्रसौरश्च ॥ चैत्रादिमौवसंतादिश्चांद्रः ॥ मीनादिमौ
मेषादिमौवासौरः ॥ मीनेमेषयोर्मेषवृषभयोर्वा वसंतइतिभेदाय
ति चोक्तेः ॥ अन्ययोर्निर्विधोगमताग्निकंटमकरः ॥ श्रौतस्मार्तक्रियाःस
र्वाः कुर्याच्चांद्रमासतः ॥ नदृष्टावितुसौरर्तुरितिज्योतिर्विदामतम् ॥
सद्विधोपिषोढः ॥ वसंतोग्रिष्मोवर्षाः ॥ शरद्धेमंतशिशिरइति ॥ इति
ऋतुः ॥ ॥ अथमासः ॥ मासश्चतुर्धा ॥ सावनःसौरश्चांद्रोनाक्षत्रइति ॥
त्रिंशद्दिनःसावनः ॥ अर्कसंक्रांतेःसंक्रांत्यवधिःसौरः ॥ अत्रकेचिद्द्वमाहि
माधवकालादर्शेव्याख्यातोचैत्रेनमेषसंक्रांत्यसमासमावास्यैकत्वंचैत्र

२ दर्शद्वयं लंघते शारदस्यैवाधिमासत्वात् पूर्वभाविनः चैत्रः ॥ अतो मीनसंक्रां

णीय
धौ.

प्रथमपरि
छेद

त्वलंघितत्वेन दृशगणान् मेषः संक्रान्तिः सौरः स्यादिति ॥ तत्र मेषसंक्रमे
यद्यास्योर्मध्यस्थपौर्णमासिकत्वं प्रथतिथिकत्वं वा चैत्रत्वमि
ति लक्षणान्वितः एव सौरश्चैत्रः ॥ एवं वैशाखादयो मेषादयोपि ॥
॥ ॥ सौरमासप्रसंगात्संक्रांतिनिर्णय उच्यते ॥ तत्र पूर्वतोपि
परतोपि संक्रमात्पुण्यकालघटिकास्तु षोडशेति सामान्यतः पुण्यका
लः सर्वत्र ॥ विशेषस्तूच्यते ॥ अत्र मामकाः संग्रहश्लोकः ॥ मा
उर्ध्वं दश पूर्वतः ॥ षडयनेस्तु परतः पूर्वतस्त्रिंशत्तु षोडश पूर्वतो
चपरतः पूर्वपरास्तु दश ॥ पूर्वाः षोडश चोत्तरा ऋतुभुवः पश्चात्तु
वेदः ॥ पुनः पूर्वाः षोडश्यश्चोत्तरा पुनरथ्याः पुण्यास्तु मेषादितः ॥ १ ॥ अस्मा
न्यमर्थीः ॥ मेषे भागोर्ध्वं चंद्रश्चापघटिकाः पुण्यकालः ॥ वृषे पूर्वाः षोड
श्यामिथुने पराः षोडश ॥ कर्के पूर्वास्त्रिंशत्तु ॥ सिंहे पूर्वाः षोडशाः ॥
कन्ये पराः षोडश ॥ तुले भागोर्ध्वं दश ॥ वृश्चिके पूर्वाः षोडश ॥ धनुषि
पराः षोडश ॥ मकरे चत्वारिंशत्पराः ॥ इदं च हेमाद्रिमतेनोक्तं ॥

३

पा घवमलेलग्नपरा विंशतिर्नाडिपूण्यपा ॥ कुंभे पूर्वाः षोडश ॥ मीने पराः षो
डशेति ॥ याम्युत्तरापूण्यपतमामासैमात्क्रांत्यां भवेत्सायदिसापीपूर्वपूर्वोत्तु
योक्तायदिसोविभाले सा पूर्वरात्रि निशि धतः स्यात् ॥ अर्वाङ्गीरिश्च
द्दिनांक्रमः स्यात्सूर्वेन्ही पूर्वेपूरतः परेन्ही ॥ आसंन याम द्वयमेव पूण्यमानि
शीथमध्येतु दिन द्वयं स्यात् ॥ चतुर्दशस्वेनममितिवाचमहेमाद्रिसूरिस्त्व
तश्चापरार्के संभः प्रदोषे यदि वा र्धरात्रे परेह्नि पूण्यं स्वधर्कर्कटकेस्य ॥ प्र
भातकाले यदि नाडिनिशिस्तनपूर्वेह्नि पूण्यं सकलनिमाधवापि ॥ अत्र मूलवचना
नि माधवपरार्के हेमाद्र्यादिषु द्रष्टव्यानि ॥ सर्वासु संक्रांतिषु दानविशेषो हे
माद्रौ दानखंडेस्त्य ॥ विश्वामित्रः ॥ मेषसंक्रमणे भानोर्मेषदानं महाफलं ॥
वृषसंक्रमणे दानं गवां प्रोक्तं फलं प्रदं ॥ वस्त्रान्नपानदानानि मिथुने विहि
तानि तु ॥ घृतधेनुप्रदानं च कर्कटेपि विशिष्यते ॥ सस्त्रवर्णं छत्रं सिंहेपि
विहितं सदा ॥ कन्याप्रवेशे वस्त्राणां यानानां च महाफलं ॥ तुलाप्रवेशे गद्य
न्यानां दानमन्नस्य चैव च ॥ कुंभप्रवेशे दानं तु गवां तृणस्य च ॥ मी
नप्रवेशे स्नानानां माल्यानामपि चोत्तममिति ॥ ॥ अत्रोपवास

३

माहादेमाद्रि आपस्तंब:॥ अयने विषुवे चैव त्रिरात्रोपोषितो नरः॥ स्नात्वा यस्त्वर्चयेद्दे-
वं सर्वकामफलं लभेत्॥ अशक्तौ तु हेमाद्रौ वसिष्ठः॥ अयने संक्रमे चैव व्यतीपाते चंद्रसूर्य-
योः॥ अहोरात्रोषितस्स्नात्वा सर्वपापैः प्रमुच्यते॥ अत्रोपवासः संक्रांतिदिने दानादि
तु पुण्यकाले दिने इत्याचार्यचूडामणिः॥ विधिलाघवात्तु पुण्यकालयुक्तदिने वोभयमिति केचित्॥ इ-
दं च त्रिरात्रपक्षातिरिक्तविषयं॥ आदित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः॥ उपवासो न कर्तव्यः
पुत्रिणां गृहिणां तथेति जैमिनीवचनात्॥ ॥ अत्र श्राद्धमुक्तं हेमाद्रौ विष्णुधर्मे॥ श्राद्धं संक्र-
मणकाले तु प्रशस्तं पृथिवीपते॥ अपरार्के विष्णुः॥ आदित्यस्य संक्रमणे विशेषेणायनद्वयोः॥
जन्मभग्रहश्चंदयस्य॥ एतास्तु श्राद्धकालान्वै काम्यानाह प्रजापतिरिति॥ द्वादशादिने रवौ
गयनांशं प्रपरार्के॥ हेमाद्रौ चापि गालवः॥ अनयाशक्तुल्येन कालेनैव स्फुटं भवेत्॥ मृगे
कर्कादिगे सूर्ये यास्यदयने सती॥ तदा संक्रांतिकाले स्युरुक्ता विष्णुपदादयः इति॥ अयना-
शस्तु तिरूपे संक्रांतिकाले विष्णुपदादयः प्रवर्तते॥ तेन तस्य सक्तं पुण्यकालादि तत्रापि ज्ञेय-
मिति स एव व्याचष्टे॥ तेन मेषायणं वृषायनमित्यादि सर्वैर्न ज्ञेयं॥ माधवीजाबालिः॥ सं-
क्रांतिषु यथाकालस्तदापेष्वयनेष्वथा॥ अयने विंशतिः पूर्वा मकरे विंशतिः परेति॥ कर्को-
यने विंशतिर्घटिकाः पुण्याः॥ मकरसंक्रांतौ पश्चादपि विंशतिर्घटिकाः पुण्याः॥ अन्यत्रायने॥
तत्संक्रांतिवदित्यर्थः॥ विष्णुपदादिस्वतपचदापिको यास्तत्ते॥ हयशीर्षे वृषसिंहवृश्चिक-
घटे अर्कस्य यः संक्रमः कन्यामीनधनुर्नृयुक्षु षडशीत्यास्य तुलामेषयोः॥ प्रोक्तं तद्वि-
षुवं समसमयं नतु दक्षकर्कटकेतरासितिति॥ हयशीर्षं विष्णुपदं॥ न्युत्तु मिथुनं॥ अस्य च पिंजर हितं॥

श्राद्धं कुर्यात् ॥ तथा च पराशरमाधवे ॥ अयनद्वितये श्राद्धं विषुवद्वितये तथा ॥ संक्रांतिषु च
सर्वासु पिंडनिर्वपणादृते इति ॥ श्राद्धं शूलपाणिः स्वस्थानि मेलनात्संकलनेपि ततः प्रवृत्ति
संक्रांताउपरागादि पर्वसु ॥ त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टं मृताहनीति मात्स्ये क्तेना
ग्रहणग्रहराविकल्पस्तले स्याह ॥ तंत्र ॥ अस्य पार्वणानि धीयकसेनापि उ विधायन्तको
त्रगपिंडो व्यक्तः ॥ अन्ये थैव पदे पिंडानुवादे त्रिलवि धीचवषट्कर्तुः प्रथमपक्षे दृष्ट
व्याप्तेः ॥ तथा चोभयसंभवे पिंडरहितपार्वणं कर्तव्यमिति उभयवचनयोरर्थः ॥
त्रिपिंडशब्देनैकोद्दिष्टव्यावर्तनमात्रं ॥ मंगलकृत्येषु विशेषमाह ज्योतिर्निबंधे नारदः ॥
साज्यास्स्वस्यस्य संक्रांते पूर्वतः परतस्तथा ॥ विवाहादिषु कार्येषु नाड्यः षोडश षोडश ॥
एतत्तुल्यकालेपि द्रष्टव्यं ॥ भानोः संक्रांतिभागेष्वतुलिक श्राद्धयामकर इति ॥ ज्योतिः
प्रकाशे व ...षु परिगणनात् ॥ अयनव्यतिरिक्तासु दशसु संक्रांतिषु रात्रौ श्राद्धस्यादि
नकार्यं ॥ अंह्निसंक्रमणे तु पुण्यमहः सकलं प्रकीर्तितम् ॥ रात्रौ संक्रमणे भानोर्दिनार्द्धं
स्नानदानयोः ॥ अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया ॥ ऊर्ध्वं संक्रमणे चोर्ध्व
मुदयात्प्रहरद्वयं ॥ पूर्णे चेदर्द्धरात्रे तु यदा संक्रमते रविः ॥ प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकर
कर्कटौ विति रद्धवसिष्ठादिवचनैरहः पुण्यतोक्तया ॥ रात्रौ संक्रमणे भानोर्दिवा कुर्यात्तु
तत्क्रियां ॥ ... सरलो वापि प्रसासे ... स्यतत्सलमिति ॥ वसिष्ठवचनाच्चार्वाक्‌रा
त्रौ स्नानादिनिषेधप्रतिपत्तेः ॥ मानितु विवाहव्रतसंक्रांतिविवाहसपरद्विष्ठ ॥ स्नान

दानादिकं कुर्यान्निशि। काम्यव्रतेषु चैवं। इति विष्णुगोभिलादि [illegible] वचनानि तानि मकर
कर्कसंक्रांतिविषयाणि तुलामकरकर्कटा इति तयोर्दिवा पुण्यस्थानस्य प्रसुदासत्तत्वादि
ति हेमाद्रिमाधवादयः॥ वस्तुतस्तु भाउत्तवचनेन तयोर्दिनद्वयपुण्यत्वादेव प्रसुदि
तान्येव मकरकर्कटेरपि स्नानदानं परेह्नि सामिरत्पुण्यत्वेन वाच्यः॥ अतः पुण्यकालानु
पपत्त्यात्स रात्रिनिषेधस्य भूयस्त्वरात्रिविधिनां बाधात्सर्वसंक्रांतिषु रात्रावनुष्ठानं विवे
सुः॥ स च देशाचाराद्व्यवतिष्ठत इति युक्तः पंथः॥ अनयास्तु वस्तव्योविशेषः॥ अग्रे
धेमा वक्ष्यते॥ ज्योतिर्निबंधे गर्गः॥ यस्य जन्मर्क्षमाधर विसंक्रमणं भवेत्॥ तन्मासाभ्यं
तरे तस्य वैरक्लेशधनक्षयः॥ लगरस्सरोत्तरः पार्श्वैः रजनीसिद्धार्थलोध्रसंयुक्तैः॥ स्नानं
जन्मर्क्षे गते रविसंक्रमरोन्ट ण्ंभभदं॥ हेमाद्रौ॥ अन्ति चंद्राग्नियुगंमस्याद्धरौ चैव द्वासर
यं॥ संक्रांतिः पाक्षिणी ज्ञेया दानाध्ययनकर्मसु॥ यत्तु गौडः॥ संक्रांतापक्षयोरंते द्वादस्यां
श्राद्धवासरे॥ सायंसंध्यायनकुर्वन् तु कुर्वंश्च पितृहा भवेत्॥ इति तद्धर्मोपदेशियासोक्तेः॥
सायं पुण्यकाले सध्यानिषेधमाहुः स्तान्निर्मूलं॥ अन्यच्च बहुवक्तव्यं विस्तरभितेनोच्यते॥
इति संक्रांतिनिर्णयः॥ ॥पक्षौ पुनश्चांद्रौ मासः॥ ॥ स द्वेधा॥ शुक्लादिरमांतः
आदिः पूर्णिमांतश्च॥ तयोश्चांद्रत्रिकांडमंडनः॥ चांद्रोपि शुक्लपक्षादिः कृष्णादिर्वेति च द्विधे

शुक्लादत्वाभेदेन व्यवस्थामाह॥ शुक्लपक्षादिकं मासमनाग्नौ तु चौलिके चिन॥ येपि छेतिन तेषांम
पि शोविंध्यस्य दक्षिणे इति॥ विंध्यदक्षिणे शुक्लादिनिषेधादुत्तरतो द्वयोरप्यनुगम्यते॥ तत्रा
पि शुक्लादिर्मुख्यः॥ कृष्णादिर्गौणः॥ शास्त्रेषु चैत्रशुक्लप्रतिपद्येव चांद्रमाससंवत्सरारंभोक्तेः॥ तदु
क्तं दीपिकायां॥ चांद्रो हो मधुशुक्लप्रतिपदादारभ इति॥ नहियेकर्दिमच्यंते तेषां संवत्स
रारंभोस्ति यतो॥ अतः शुक्लादिर्मुख्यः॥ कृष्णादिनोमलयामासं भावाच्चचंद्रस्य सर्वेन क्षत्र
योगेन चांद्रो मासः॥ सावनादीनां व्यवस्थोक्ता हेमाद्रौ ब्रह्मसिद्धांते॥ अमावास्यापरिच्छिन्नो
मासस्याद्ब्राह्मणस्य तु॥ संक्रांतिपौर्णमासाभ्यां तथैवान्यवैश्ययोः॥ अत्र ब्राह्मणादीनां वच
नांतरेण अत्र कर्मविशेषे वसंते ब्राह्मणोमादधीतेत्यादिवन्मास उक्तेस्तत्र दर्शीतन्मासं ग्रहणी
यम्यते ननु सर्वकर्मसु दर्शान्त एवेति॥ वस्त्यावध्यसौ मासे हि पादिभि धननियमवद्विधिलाघ
वान्॥ चैवर्णिकानां सर्वकर्मसु मासविशेषविधेः सावनादीनां श्रद्धातुल्ये मादिपरता प्रत्येक्षे
तिष्ठत एवः॥ ज्योतिर्गर्गः॥ सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः॥ आब्दिके पित्र्य
कार्ये च चांद्रो मासः प्रशस्यते॥ स्मृत्यंतरे॥ विवाहव्रतयज्ञेषु सौरमानं प्रशस्यते॥ पार्वण
त्वष्टकाश्राद्धे चांद्रमिष्टं तथाब्दिके॥ स्मृत्यंतरे॥ एकोद्दिष्टं विवाहादौ ऋणादौ सौरसाव
नौ॥ ज्योतिर्गर्गः॥ आयुर्दायविभागश्च प्रायश्चित्तक्रियास्तथा॥ सावने नैव कर्तव्या शक्राणां चाप्युपासना॥

विष्णुधर्मे॥ न क्षयस ग्राण्ययनानि ये दो मासे न कुर्यात् द्रगणात् सदैवेति ग्रासे॥ तिथिस
से च सर्वादिव्रतेषु कुर्वादि मे वच॥ विवाहादौ च सौरादिमासं सद्दैवे निर्दिशेत्॥ ॥अथम
लमासः॥ तत्रैकसंक्रांतिरहितः सितादिश्चांद्रोमासो मलमासः॥ एवं संक्रांतिरहितस
संक्रांतिद्वयवहे न च स्वविलीलि॥ मलमासो द्विधा॥ अधिकमासः क्षयमासः श्चेति॥ तदु
क्तं कारकागृहे॥ यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा॥ मलमासः स विज्ञेयो मासस्त्या
त्रयोदश॥ इति॥ सप्तश्लोपि॥ राशिद्वयं यमासे संक्रमेत् दिवाकरः॥ नाधिमासो भवेदेष
मलमासस्तु केवलमिति॥ अधिमासस्य पक्षात् नियममतावसिष्ठः॥ द्वात्रिंशद्भिर्गतैर्मासै
दिनैः षोडशभिस्तथा॥ घटिकानां चतुष्के न पतत्यधिकमासः इति॥ एतच्च संभवार्थं न तु नि
यमार्थं॥ अन्यथा षोडशदिनाधिक द्वात्रिंशन्मासानंतरं द्व्यसपद्यनियमेषु क्वादियत्वं प्रसं
पत्तेः॥ तेनन्यूनाधिककाले मलमासपातेपि न दोषः॥ अत एवोक्तं माधवीये॥ मासत्रिंशत्त
मे प्राहैरिति॥ क्षयस्यापि ज्योतिःशास्त्रे॥ असंक्रांतिमासोधिमासः स्फुटः स्यात् द्विसंक्रांति
मासः क्षयाख्यः कदाचित्॥ क्षयः कार्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्येधिमासद्वयं तु॥ ए
कक्षयात्पूर्वं परत्र चैकइत्यधिमासद्वयमपलीसर्पः॥ अत्रविशेषमाह॥ जाबालिः॥ मास
द्वये ब्दमध्येतु संक्रांतिर्नैयदा भवेत्॥ प्राकृतस्तत्र पूर्वस्यादधिमासस्तथोत्तर इति॥ उत्तर
स्मिन्नेव काम्यादिकं न ह्यत्र स्मिन्निसर्पः॥ पत्तु ब्रह्मसिद्धांते॥ चैत्रादर्वाक् अधिमासः परत

६८

स्याधिको भवेदिति ॥ यच्च ज्योतिःसिद्धांते ॥ ॥ घटकन्यागते सूर्ये वृश्चिके वाथ धनुषि ॥
मकरे वाथ कुंभे वा नाधिमासो विधीयत इति ॥ तत्क्षयपूर्वभाव्यधिमासस्य कालादिकं नि
षधार्थं तदधिकमासस्य ॥ दशादीनां फाल्गुनादीनां मायोमा स्यषचक्रचित् ॥ नपुंसकं
हे मस्वतां प्रेषशास्त्र विनिश्चय इति हेमाद्रौ विष्णुधर्मविरोधात् ॥ मलमासे एकादानिषे
धानुपपत्तेश्च ॥ मकरे वाथ कुंभे नेति हि सार्थं मास्यपावात् ॥ क्षयस्यागमनकालस्तु
सिद्धांतशिरोमणौ ॥ गतोब्ध्यद्रिनंदैर्मिते शाककाले तिथीशैर्भविष्यत्यथांगाक्षसूर्यैः ॥
गजाद्र्यग्निभूमिस्तथा प्रायशोयं कुवेदेंदुवर्षैः क्वचिद्गोकुभिश्च ॥ ति ॥ अब्धयः श्चत्वारं ॥ ४
अद्रयः सप्त ७ नंदाः ९ एव च एषां प्रतिलोम्येन पाते ९७४ तैर्मितवर्षे क्षयमासः सर्वजातस्य
र्थे ॥ तिथयः पंचदश ईशा एकादश ११९५ एवं मिते याते काले भविष्यती सूर्ये ॥ अंगः ६ अक्षाः ५
सूर्या १२ एवं १२५६ गजे ८ अद्रि ७ अग्नि ३ भू १ एवं १३७८ कु १ वेद ४ इंदु १ एवं १४१ गवः ९
भू १ एवं ११ एवं मिते वर्षे याते काले भविष्यती सूर्ये ॥ अथ मलमासे कार्याण्युच्यते ॥ ॥ त
त्र जाबालिः ॥ नित्ये नैमित्तिके कुर्यात्प्रयतः सन्मलिम्लुते ॥ तीर्थ स्नानं गजच्छायां काम्यं नैव कदाच
न ॥ अयं च काम्यं निषेधः आरंभसमाप्तिविषयः ॥ अगस्त्योनामये मासा नलेषु मसमन्वितः ॥
व्रतानां चैव यज्ञानामारंभश्च समापनात् इति तेनैवोक्तात् ॥ अस्त्यधिमासादयः ॥ अत्र मंगल
तपते रवेरिति वचनात् ॥ कार्याः काम्यस्यारंभसमाप्ति भवतश्च वेत्यादिरन्यत्र विस्त
रः ॥ कारव गत्तेषु ॥ मलेन वा गतिं कुर्यान्वित्य नैमित्तिकी क्रियामिति ॥ तानि नैमित्तिकानि

६

दीपिकायामुक्तानि॥ यन्नैमित्तिकमग्निना अनुगताग्न्याधानमर्थात्तच्चासंस्काराद्दिविलो
पमोसती पुनः प्राप्तप्रविष्टादिकमिति॥ गमनं रयतनुसोमादिष्टमेवच॥ तत्र कर्तव्यान्युक्ता
नि कालदर्शे॥ द्वादशाह सपिंडांतकर्मपूर्णस्य जन्मनो॥ स्मृतं तेषु सर्वेषु श्राद्धदानेनो जातकर्म
च॥ रोगशांतिरलभ्ये च योगे श्राद्धव्रतानि च॥ प्रायश्चित्तं निमित्तस्य वशात्सर्वे परत्र च॥ अत्र
दर्शे मन्वादिमहालययुगादिषु॥ श्राद्धदर्शे पहर तः श्राद्धं नामासिकम्॥ मौलिस्तु चान्यमा
सेषु स्मृतानां श्राद्धमाब्दिकं॥ श्राद्धं तु पर्वहेतु तीर्थे देवयुगादिषु॥ मन्वादिषु च यद्दानं दादानं
ने रिंनं च यत्॥ तिलगो हिरण्यानां सं ध्योपासन धाः क्रिया॥ पर्वहोमस्थालीपाकसाग्नेरि
ष्टिपर्वणि॥ नित्याग्निहोत्रहोमादि देवतातिथिपूजने॥ स्नानं च स्नानविधिनाप्यनाप्य प्रश्रय्या
येयवर्जनं॥ तर्पणं च निमित्तस्य नियतादुपयन्वेति॥ एतोपुंसवनसीमंतौ॥ एतत्र गर्भाधाना
धन्नप्राशनानंतसंस्कारे पिलक्षणं॥ तदुक्तं दीपिकायां॥ गर्भाधानपुंसवनचौलविधितः प्राजा
तयालं विना वृषभाग्रयणं गजेन्दुपुरतस्थायामघानगयोः॥ तीर्थेदुक्षयमावास्या पिष्यमपि वेम
स्येवमाघान्तरे दिति॥ अलभ्ययोगे दिर्दोषपद्धकादौ काम्या अन्यापि व्रतादिनिकार्याणीय
र्थः॥ पूर्वपरत्र च मलेस्तु ज्ञेयेह्यर्थः॥ महालयश्राद्धेन माघाश्रयोदश्युच्यते इति माधवः॥ ते
स्मिंस्त्रयोदशे श्राद्धं न कुर्याद्दिंदुसंक्षयइति॥ तत्काम्यदर्शश्राद्धविषयम्॥ काम्यं नैवप्र
दाच्चनेति वचनात्॥ दर्शे च काम्यश्राद्धं कन्याकन्यावेदिनस्थेह्यादिया नवस्त्येनोक्तं॥

१५

वा

निमित्तमत्वेपि सवर्णै ॥ दर्शश्रुतिरतः श्राद्धदानेच भानि वासरं ॥ गोभूतिलहिरण्यादानं मासेपि
स्यान्मलिम्लुचे इति पारस्करोक्तेः रतिहेमाद्यादयः ॥ दिवोदासीये पि ॥ अनिर्दिष्टं बुद्धं मलीचपू
र्णा च हरिहरे वरेषु ध्याद्धमा ॥ नाधिमासे परित्याज्याः सामंतो ज्ञाशनेश शोरिति ॥ जनि
ऐ हु दर्शः ॥ द्विविधमप्यमाश्राद्धं न कार्यमिति परार्थः ॥ ततः यदि हितं कर्म उत्तरे मासि दितं स्ते ॥
मस्याधातौ दिवसोदासी सिस्तुद्धमासकरं पि शास्त्रो पेऽन्ते दर्शे आमश्वेन कार्यमिति भाचीनगौडः कुं
स्थलपाणिवश्च ॥ संवत्सरं सदा पेपा ॥ एकराशिस्थिते स्तर्ये यदा दर्शद्वयं भवेत् ॥ दर्शश्राद्धं तदो
स्यानपरित्र मलिम्लुचे ॥ अत्र भागवद्धे वरच्छा ॥ यद्यपि कालादर्शे सर्वे वार्षिकं मासद्वयेपका
र्यमिति सकेत तथापि हेमाद्रिमाधवापरार्कादि मतात्तेमवार्षिकं मलमासे हित्वा याद्दिकं तु शु
द्धमास एव कार्यं ॥ असंक्रांतेपि कर्तव्यमाद्दिकं प्रथमाद्दिके ॥ तथैव मासिकं श्राद्धं सपिंडीक
रणं तथेति हारीतोक्तेः ॥ आब्दिकं प्रथमं यत्स्यात् तत्कृतं मलिम्लुचे ॥ चतुर्दश्यां तु संज्ञात्र तु कुर्यात् पुन
स्म राब्दिकमिति हेमाद्रौ ॥ द्वितीयाब्दिकं हित्वा याब्दिवार्षिकं त्रयोदशमासेपि तिन चतुर्दशाद्यादि नेकुर्या कु
दित्यर्थः ॥ यत्तु सत्यव्रतः ॥ वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृते हनि ॥ मलमासे न कार्यं व्याघ्र
या स्य वचनं यथेति न द्विती द्विवार्षिक विषयं ॥ आब्दिकं प्रथमं यत्स्यात् तत्कुर्यात् मलिम्लुचे इति
प्रत्येंक्तवचनात् ॥ तेन द्वितीयादि शुद्धमास एव ॥ एवं चंद्रोदयैदिवोदासीये मदनपारिजाते चैवं ॥

ने

मलमासमृतानांतु यदास्यद्वार्षिकः ॥ तस्मिन्नदादिने वै कार्यं ॥ यदाह पैठीनसिः ॥ म
लमासेमृतानांतु श्राद्धं यत्प्रतिवत्सरं ॥ मलमासेपि कर्तव्यं नान्येषांतु कदाचनेति ॥ य
त्तु वृद्धहारीतः ॥ श्राद्धियानि संमासे अधिमासो भवेद्यदि ॥ मासद्वयेपि कुर्वीत श्राद्धमेवं
तत्तु ह्यति ॥ यच्च व्यासः ॥ उत्तरे दैवकार्याणि पित्र्यकार्याणि चोभयोरिति तन्मासिकादि
विषयं ॥ योगादिकं मासिकं च श्राद्धं चापरपाक्षिकं ॥ गयादिकं तीर्थिकं च कुर्यान्मासद्वयेपि
चेति स्मृतिचन्द्रिकोक्तेः ॥ तीर्थिकं तीर्थश्राद्धं ॥ तच्च मासद्वयेपि कार्यं त्रिस्थलीसेतौ भट्टैः ॥
केचित्तु प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरं ॥ मन्वादौ च युगादौ च तन्मासोरुभयोरपि ति
मरीतिवचनात् ॥ वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेहनि मासद्वयेपि तत्कार्यं व्याघ्रस्य वचनं
यथेति गालवोक्तेश्च प्रत्याब्दिकं मासद्वयेपि कार्यमित्याहुः ॥ तत्तुच्छम् ॥ प्रतिमासं मृताहे क्रि
क्रियमाणं मासिके प्रतिसंवत्सरं क्रियमाणं वत्स्यादिश्राद्धमिति मरीचिवचस्य मदनरत्नेव्या
ख्यानात् ॥ गालवीयस्य च मासद्वयात्मकक्षयमासपरतया माधवेन व्याख्यानात् ॥ यच्चबौधा
दुक्तं ॥ प्रथमाब्दिके मासद्वये कार्यं ॥ आब्दिके प्रथमं यस्यात्तत्कुर्वीत मलिम्लुचे ॥ त्रयोद
शे च संप्राप्ते कुर्वीत पुनराब्दिकमिति यमोक्तेरिति ॥ तदपि चिंत्यं ॥ पुनराब्दिकं द्वितीयादि
वार्षिकं त्रयोदशे कुर्यात् ॥ अन्यथा संवत्सरवर्धेन श्राद्धं न स्यात्तेहनिति पैठीनसिविरोधस्या

८

धि

दित्तिहेमाद्रौ पृथ्वी चंद्रोदयेच ॥ एतेन वर्द्धेतनाधिक्याद्युमेकंकुर्यादेवेसनंतभट्टव्याख्या
नाल्प्रोक्तासरास्त ॥ यद्यपिनिर्णयामृते पूर्वोक्तकादर्शवचनात्तु अंहेमासिपिंडश्राद्धं
कुर्यात् ॥ पिंडवर्जमसंक्रांतेसंक्रांत्पिंडसंयुतं ॥ प्रतिसंवत्सरंश्राद्धमेवंमासद्वयेपिचेति ॥ द्वद्ध
पराशरोक्तेरिति ॥ तदपिचिंत्यं ॥ पूर्वोक्तवचनस्यक्षयपूर्वसाव्याधिकमासविषयत्वात् ॥
तत्रहिमासद्वयेश्राद्धमुक्तं ॥ तदाहसत्सल्पः ॥ एकएवयदामासः संक्रांतिद्वयसंयुतः ॥ मा
सद्वयगतश्राद्धंमलमासेपिशस्यतेरवेः ॥ मासद्वयगतंपूर्वासंक्रांतगतक्षयगतंच ॥ मलमा
सेक्षयमासे ॥ अपिशब्दात्सर्वमासेचेतिहेमाद्रिः दीपिकापि ॥ नस्याक्कसायूपिकोमासःक्वापि
दिभवेत्तत्रसंसोवत्सरंतस्मिन्नक्षुद्धतयाक्षयेन्यवचनात्कुर्याद्वयोः कोविदरति ॥ कालादर्शोपित
विषयएवेत्यलंबहुना ॥ ॥ मलमासेवर्ज्यान्यकृत्यानिकालादर्शे ॥ ॥ अनित्यमनैमित्तंचदानं
चमहदादिकं ॥ अग्न्याधानाध्वरासर्वेतीर्थयात्रामरेक्षयं ॥ देवरामतडागादिप्रतिष्ठामौंजिबंधनं ॥
आश्रमस्वीकृतःकाम्यवृषोत्सर्वस्यनिष्क्रमः ॥ राजाभिषेकः प्रथमश्चूडाकर्मव्रतानिच ॥ अन्नप्राशनमारं
भो गृहाणांचप्रवेशनं ॥ स्नानंविवाहोनामानि अन्यत्रदेवमहोत्सवः ॥ व्रतारंभसमाप्तीचकाम्य
काम्यंचपशप्रनं ॥ शायाश्रितंनतुतेसर्वंमलमासेविवर्जयेत् ॥ उपाकर्मोत्सर्जनंचपवित्रदमना
र्पणं ॥ अवरोहश्चहेमंतः सर्पाणांबलिरष्टिका ॥ ईशानस्यबलिर्विष्णोशयनंपरिवर्तनं ॥
दुर्गेंद्रस्थापनोत्स्थानेध्वजोत्स्थानंचबज्रिणः ॥ पूर्वमप्रतिषिद्धानिपरत्रान्यच्छेदेविकमिति ॥

८

अथ मलवचनानि हेमाद्रिमाधवादिभ्योज्ञेयानि दिवोदासीयेपि॥ याज्ञोत्सवं चूडादि शयनं दिव्य
मेवच॥ मलमासे न कुर्वीत व्यासस्य वचनं यथेति॥ अयननिर्णयः क्षयमासेपि ज्ञेयः॥ रविसंक्र
श्रीः मरहितेयोवर्ज्योवर्ज्यविधिस्मृतः॥ सएव शुद्धिसंतो मलमासेषु दारितः इति काठकगृह्योक्तेः क्षय
मासस्मृतानां प्रसादिकेविशेषो हेमाद्रौ॥ तिथ्यर्धे प्रथमे पूर्वो द्वितीयार्धे तदुत्तरः॥ मासाविति
तिथु धैः स्मृतिंसोक्षयमासस्य मध्यगो॥ आब्दिकवद्धीयतेपि ज्ञेयम्॥ यन्मलयामासेव ज्येष्ठ
क्ते॥ तत्र घष्ठादयो वैरस्वादिष्वपि ज्ञेयं॥ तदा बृहस्पतिः॥ बाल्ये वा यदिवा वृद्धे शुक्रेवास्तंगते रवौ॥ म
लमासइवैतानि वर्जयेत्तीर्थयात्रां विवर्जयेत्॥ अत्र तीर्थे [illegible] भावामात्रे न तु फलमिति वाच
स्पतिमिश्राः॥ तत्र प्रसतिबाके फलहेतुत्वाक्षतेः॥ तल्लोपि॥ नीचस्थे वक्रसंस्थेप्यतिचारगे
गते बाल्ये वृद्धे स्तंगते वा संन्यासोपसदो व्रतनियमविधिः॥ कर्णवेधस्तु दीक्षा॥ मौंजी
बंधो गनानां परिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्रिदशमपि गुरौ सिंहराशिस्थि
तेवेति॥ दीक्षायागदीक्षागमदीक्षाच॥ तथा॥ उद्योतं च जातकर्मं च दीक्षाविवाहयो॥ च वधू
प्रवेशं॥ तडागकूपत्रिदशप्रतिष्ठा बृहस्पतौ सिंहगते न कुर्यात्॥ दिवोदासीये॥ गुर्वादित्ये गुरौ
सिंहे नष्टे शुक्रे मलिम्लुचे॥ गृहकर्म व्रतं यात्रा मनसापि न चिंतयेत्॥ अस्यापवादः॥ तत्रैव व्रात्ये॥
मुंडनं चोपवासं च गोतम्यां सिंहगे गुरौ॥ कन्यागते तु यायांनदा तु तीरवासिनां॥ तथा॥ आद्यसागो
ज्या तमी गंगा द्वितीया यान्हवी स्मृता॥ सर्वतीर्थफलं स्नानां गोतम्यां सिंहगे गुरौ॥ ॥संहिताप्रदीपे॥ ॥ २
शाः सदा रात्रं गुरुर्भरेभयोरश्वबलिते मन्हादशकं च वार्द्धं॥ वृद्धोसिते ज्यावसु सोशिशु [illegible] हेरास्तो॥

९

यतस्तावुपशीयमानौ ॥ वसिष्ठः ॥ अतिचारगते जीवे वर्जयेत्तदनंतरम् ॥ व्रतोद्वाहादिकार्येषु अ
ष्टाविंशतिवासरान् ॥ बाल्यादिलक्षणमुक्तं ब्रह्मसिद्धांते ॥ रविणा सतिरस्यैषां यत्र लग्नमस्तश्च्युते ॥
ततो वार्द्धकं प्रोक्तमूर्ध्वं बाल्यमपि त्रिमिति ॥ बाल्यादिपरिमाणं व्यनशाते ॥ ॥ बालस्तु अदि
व सोदशाहे पंचाहमेव वृद्धः पंचादनन्तरात्रिलयमुदितः पक्षमेकं ज्यो क्रमेण ॥ जीवो वृद्धः सौमुर
पिः सदा पक्षमेन्ये शशस्तैस्तु द्वौ प्रोक्तौ दिवसदशकं चापरैः सप्तरात्रं ॥ पश्चिमस्तउदये दशादिना
नि बालः ॥ अस्ते पंचदिनानि वृद्धिः ॥ पूर्वे तो दिनत्रयं बालः पक्षं च वृद्ध इत्यर्थः ॥ जीवे गुरू ॥ अ
न्यत्र लन्यथो क्तं ॥ प्राक् पश्चादुदितः शुक्रः पंचसप्तदिनः शिशुः ॥ विपरीते तु वृद्धं त्वं दशदेवगुरोरपि
ति ॥ येषां च पक्षाणां व्यवस्थामाह मिहारः ॥ बहवो दर्शिताः कालाये बाल्यवार्द्धके पिना ॥ आह्या

ति

स्तत्राधिकारो देशदाकुतायादौ देशभेदेन मदनरत्ने गार्ग्यः ॥ शुक्रो गुरुः प्राक् च परान्यबालो
विंध्यदेशा बंगलिषु सप्तरात्रं ॥ वंगेषु हूणेषु च षट् पंचशेषदेशे दिनवदंतीति ॥ बालत्वे चैव वृद्धत्वमेके
कं दिनं दिनमेव च ॥ गुरुभार्गवयोर्मौढ्य प्रवदंति विपश्चित इति ॥ अस्तादेवपवादः काशीखंडे
उक्तः ॥ नग्रहास्तोदयकृतो देशो विश्वेश्वरालये ॥ त्रिस्थलीसेतो वायवा ये ॥ गोदावर्यां गयायां च
श्रीशैले ग्रहणोद्ये ॥ सुरासुरगुरूणां च मौढ्यदोषो न विद्यते ॥ ग्रहणोद्यमिति कुरुक्षेत्रयात्रा दाना
विसर्थः ॥ तदा ह त्रिस्थलीसेतो लल ॥ उपप्लवे सितलाभानु भान्वोर्स्छौ दये वेकपिलाख्यषष्ठ्यां ॥
सुरासुरेज्यास्तमये पितीर्थे यात्राविधिः संक्रमणे च शस्तः ॥ गयायां सर्वकालेषु पिंडं दद्याद्विचक्ष
णः ॥ अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः ॥ नत्यक्तं व्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ । इतित्रि

वेश्वरेणोक्तत्वाद्गयायामपि न निषेधस्य बलं वक्तुं न॥ मल मासे च विशेष पृथ्वीचंद्रो हेमाद्रौ पाद्मे॥ अधि
मासे तु संप्राप्ते घृतस पूपुलानि च॥ त्रयस्त्रिंशद पूपानि दातव्यानि दिने दिने॥ साज्यानि गुडमिश्रा
नि अधिमासे च पोत्तमम्॥ अधिमासे तु संप्राप्ते त्रय[...]स्त्रिंशत्तु देवताः॥ उद्दिश्या[...]पूपदानेन पृथ्वी
दानं फलं भवेत्॥ त्रयस्त्रिंशदपूपान्नेकांश्या पात्रे निधाय च॥ सघृतं सहिरण्यं च ब्राह्मणाय नि
वेदयेत्॥ विष्णुरूपः सहस्रांशुः सर्वपापप्रणाशनः॥ अपूपान्नप्रदानेन मम पापं व्यपोहतु॥ ना
रायण जगद्बीज भास्कर प्रतिरूपकं॥ व्रतेनानेन पुत्रांश्च संपदं चापि वर्द्धय॥ यस्य हस्ते गदाचक्रे
गरुडो यस्य वाहनं॥ शंखः करतले यस्य स मे विष्णुः प्रसीदतु॥ कलाकाष्ठादिरूपेण निमेषघटि
कादिना॥ यो वंचयति भूतानि तस्मै कालात्मने नमः॥ कुरुक्षेत्रमयो देशः कालः पर्व द्विजो हरिः॥ पृ
थ्वीसममिदं दानं गृहाण पुरुषोत्तम॥ मलानां च विशुद्ध्यर्थं पापप्रशमनाय च॥ पुत्रपौत्राभिवृ
द्ध्यर्थं तव दास्यामि भास्कर॥ मंत्रेणानेन यो दद्यात्त्रयस्त्रिंशदपूपकान्॥ प्राप्नोति विपुलां लक्ष्मीं पुत्र
पौत्रादिसंपद इति॥ ॥इति कमलाकरभट्टकृते निर्णयसिंधौ मलमासनिर्णयः॥ ॥
पक्षनिर्णयस्तु॥ देवरव्यः शुक्लपक्षे कृष्ण[...] पित्र्ये विशेष इति माधवोक्तेः॥ ॥अथ ति
थिनिर्णयः॥ तत्र तिथिर्द्वेधा॥ शुद्धा विद्धा च॥ दिने तिथ्यंतरसंबंधरहिता शुद्धा॥ तद्रहिता वि
द्धा॥ तत्र शुद्धायां संदेह॥ विद्धा निर्णीयते॥ तत्र मासाद्यन्यतो वेधमाह माधवीये पैठीनसिः॥ पक्ष
द्वयेपि तिथयस्तिथिं पूर्वोत्तरां तथा॥ त्रिभिर्मुहूर्तैर्विध्यंति सामान्योयं विधिः स्मृत इति॥ हेमाद्रौ मदन

रत्ना दैवलुद्धिमुहूर्तैर्युक्तः॥ उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ॥ द्विमुहूर्तं त्रिरह्नश्च सा
तिथिर्हव्यकव्ययोरिति विष्णुधर्मोक्तेः॥ द्विमुहूर्तं च यानुवत्स्य॥ द्विमुहूर्तापि कर्तव्या या तिथिर्वृ
द्धगामिनीति दक्षोक्तापि शब्दोक्तेः॥ अयं वेधः प्रातरेव सायं तु त्रिमुहूर्त एव॥ या तिथिं समनुप्रा
प्य यातस्तं पद्मिनीपतिः॥ सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेत्॥ दिति॥ स्कांदोक्तेः॥ दापि
कापि॥ त्रिमुहूर्ता तु सकलासायेति॥ यानिलु॥ ॥व्रतोपवासस्नानादौ घटिकैकापि या भवेत्॥
उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी॥ इत्यादिना स्कांदादिवचनानि तानि वैश्वानरन्या
येनावयवस्तुता त्रिमुहूर्तप्रशंसापराणि॥ तिथिविशेषे वेधविशेष स्कांदे॥ नागो द्वादशना
डीभिर्दिनकंपंचदशभिस्तथा॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति॥ अयं चोपवा
सातिरिक्तविषय इति वक्ष्यते॥ ॥इति वेधः॥ तत्र सर्वा तिथियदल॥ कर्मकालव्यापिनी सैव ग्रा
ह्या॥ कर्म यो यस्य यः कालस्तत्कालव्यापिनी तिथिः॥ तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति॥
विष्णुधर्मोक्तेः॥ दिनद्वये तद्व्याप्तावव्याप्तौ चैकदेशव्याप्तौ वाक्यान्निर्णयः॥ तस्य प्रवीबाधेनोपपत्तेः॥
युग्मवाक्यं तु नियमः॥ युग्माग्नियुग्मभूतानां षण्मुन्योर्वसुरंध्रयोः॥ रुद्रेण द्वादशी युक्ता चतु
र्दश्या च पौर्णिमा॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं॥ एतद्व्यस्तं महादोषं हंति पुण्यं
पुरा कृतमिति॥ अत्र रंध्रेति॥ शब्दाद्द्वितीयादिनवम्यंतिचतः॥ रुद्र एकादशी॥ द्वितीयायात्तती
यायुक्ता॥ साच द्वितीयायुतेति सप्त युग्मानीत्यर्थः॥ इदं शुक्लपक्षे॥ अमा प्रतिपद्युग्मस्य प्रशं
मायाश्च नत्रेव सहा दितिकेचित्॥ तन्नतमात्रं तिपद्युग्मा॥ कृष्णपक्षे लिंगाभावात्तयद्वय परमिदं

तच्चविशेषवाक्यैः स्वपक्षेतिथिविशेषोपोद्घातइति॥ दशमींप्रकृत्यपुराणसमुच्चये॥ संपूर्णादशमीका
र्यामिश्रितापूर्वयावेवि॥ संपूर्णेसु कृष्णपक्षे॥ त्रयोदशीतुसुमंतुनोक्ता॥ त्रयोदशीतिकर्तव्याद्वादशी
सहितामुनेइति॥ कृष्णपक्षेसाप्युत्तरैव॥ प्रतिपत्सहितायास्यात्तद्वितीयाप्रतिपद्युता॥ चतुर्थीसंयुता
याचेसान्हतीयाफलप्रदा॥ पंचमीचप्रकर्तव्याषष्ठ्यायुक्ताचनारद॥ कृष्णपक्षेष्टमीचैवकृष्णपक्षेच
तुर्दशी॥ पूर्वविद्धाप्रकर्तव्यापरविद्धानअन्यचित्॥ दशमीचप्रकर्तव्यासदुर्गाद्विजसत्तम॥ षष्ठ्यष्ट
मीत्वमावास्याकृष्णपक्षेत्रयोदशी॥ एताःपरयुताःपूज्याःपराःपूर्वेणसंयुताः इति॥ यत्तुव्याघ्रः॥
खर्वोदर्पस्तथाहिंसात्रिविधंतिथिलक्षणं॥ खर्वदर्पौपरौपूज्यौहिंसास्यात्पूर्वकालिकीति॥ खर्वसा
म्यंगदर्पोवृद्धिः॥ तयोःपराःहिंसाक्षयः॥ तत्रएवेसर्वं॥ ॥ एतच्छ्राद्धादिविषयं॥ द्वितीयादिषुयुग्मा
नांक्षयत्तानियमादिषु॥ एकोद्दिष्टादिव्रतादौ ह्रासवृध्यादिचोदिनेतिव्यासोक्तेः॥ नियमादिषुव्र
तदा॥ दिदेवकर्मसु॥ एकोद्दिष्टोदिष्वदितितिथेर्वृध्यादाविसर्थेः॥ कर्मकालस्याद्याभावेतुकामोपत्र
मकालस्सेवग्राह्या॥ कर्मोपक्रमकालगातुसन्निग्निग्राह्यानयुग्मादशतिदीपिकोक्तेः॥ यान्तितु॥ यो
तिथिःसमनुप्राप्यउदयंयातिभास्करः॥ सातिथिःसकलाज्ञेयादानाध्ययनकर्मसु॥ इत्यादीनितानि
त्रिमुहूर्तादिस्तुतिरितिनिर्णयदीपोली॥ ॥ अथैकभक्तं॥ ॥ तत्कालःपाद्मे॥ मध्याह्नव्यापिनीया
ह्याएकभक्तेसदातिथिरिति॥ मध्याह्नस्त्रपंचधाभक्तेदिनत्वलापोत्तेः॥ तेनयद्यपिद्वादशदंडानंतरं
प्राप्यतेतथापिदिनार्धसमयेतातेपुष्मेतेनियमेनियतः॥ एकभक्तमितिमोक्तेन्दनग्रोसत्रयेणचेतिस्कं॥

स्तु पर्यंतं गौणः ॥ दिवैव हि सस्येव षष्ट्यां घसे तत्परत्वात् ॥ तत्र पूर्वेद्युर्व्याप्तिः परेद्युरुभयदे

दोक्ते ॥ षोडशास्तद्दशादं शेषु रव्यकाला ॥ दीपिकायां तु ॥ मध्याह्नात्प्राग्दले त्रिमगादिवसे स्यामेकभ
मिति ॥ ततः सूर्यो द्युव्याप्तिद्वा वैशव्याप्तिस्तत्रापि साम्यं वैषम्ये चेति षट् पक्षाः ॥ तत्राद्ययोः सं
देह एव ॥ तृतीये तु पूर्वैव हि गौणमुख्यव्याप्ते सत्वात् पूर्वैवेति माधव ॥ युग्मवाक्यान्निर्णयः स्फुलिते मा
न्द्रिः ॥ चतुर्थपक्षे तु पूर्वैव गौणः कालव्याप्तेः सत्वात् ॥ वैषम्ये त्वंशव्याप्तो याधिका सैव ग्राह्या ॥ सा
म्ये पूर्वा ॥ अयं च रत्नतन्त्रे कृत्सत्कृत्निर्णयः ॥ अन्ये तु गोउ पवासप्रतिनिधौ तद्वत्सारेण निर्णयः ॥ ॥
अथ नक्तं ॥ ॥ तच्च दिनानशन पूर्वं रात्रिभोजनम् ॥ तत्र प्रदोषव्यापिनी ग्राह्या ॥ प्रदोषव्यापिनी ग्रा
ह्या तिथिर्नक्तव्रते सदेति वत्सोक्तेः प्रदोषस्तु त्रिमुहूर्तः प्रदोषस्याह्नावस्तं गते सूर्ये नक्तं
तत्र प्रकर्तव्यमिति शास्त्रविनिश्चय इति मदनरत्ने व्यासोक्तेः ॥ तथापि त्रिद्वेजेनंतरं कार्यं ॥ सायंसंध्या
त्रिघटिकास्तादुपरि भास्करादिति स्कांदोक्ते देउ भयस्ये ध्याहाल तत्र च चत्वारि मानि कर्माणि संध्या
यां परिवर्जयेत् ॥ आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकमिति माधवोक्तेः नेन भोजनं निषेधात् ॥ म
हानौ मदिनं प्रोक्तं भवदं तिमनीषिणः ॥ नक्षत्रदर्शनान्नक्तमन्ये गणाधिपेति माधवीये भविष्यो
क्तेश्च ॥ गौणस्तु ॥ प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यत इति वत्सोक्तेः प्रदोषसंध्या वदन्नरा
योः संधौ मुहूर्तिः ॥ अर्द्धास्तमयात्संध्या व्यक्तिभूता न तारका यावत् ॥ तेजः परिहानिवशा
द्भानोरर्धोदयं यावदिति वराहरुचेरि साह ॥ तथा ॥ अस्य संध्या वंदनान ध्यादिपरिसोधू ॥ अ
तएव प्रवरकउ मे मंजलस्य संध्याहे मुक्तं विज्ञानेश्वरेण ॥ यत्तु मदनरत्ने ॥ नक्तस्य च घला द्वा

सं

नं

मासस्तो जनयोश्च रोयं निषेधस्तु नक्तं॥ तन्न॥ विधौ निषेधावरो धात्॥ अन्यथा अपिंजलानान्यनभ्यो
धिकानां हिंस्यात्सेनेत्तं॥ सायंकालेन नक्तं तु दिनद्वये प्रदोषस्य शोभेयम्॥ जनयाते परपस्याद
स्तादर्वाग्यतो हिसेति जाबालिवचनात्॥ प्रदोषव्यापिनी नस्यादिवानक्तं वि[illegible]धीयते॥
आत्मनो द्विगुणच्छायामंदीभूते तु भास्करे॥ नतक्तं नक्तमित्याहुर्न नक्तं निशि भोजनमिति स्कांदाच्च॥
इत्यादिनामपि सायाह्ने नक्तमुक्तं॥ नक्षत्रदर्शनान्नक्तं यह स्थस्य तु बुधैः स्मृतं॥ यतेर्दिनाष्टमे भागे
पि तस्य रात्रौ निषिद्धत्वा इति हेमाद्रावुक्तं॥ नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः॥ यतिश्च विध
वो चैव कुर्यात्तत्सदिवाकरमिति त्रैव स्मृत्यंतरात्॥ इदमेव भोजिविधुरोपलक्षणं॥ पुत्रवतस्तु रावेव॥
आनश्रमो न्याश्रमी स्याद पत्नीकोपि विधुरो नोनिति संग्रहोक्तेः॥ सौरनक्तं तु दिवैव॥ त्रिमुहूर्तस्प
गे वान्हि शिन्नि चेत्तावलीनिधिः॥ तस्यां सौरप्रयेन क्षमहन्येव तु भोजनमिति सुमंतूक्तेः॥ ॥
हरिनक्तं तु विशेषः॥ कालादर्शे स्कांदे॥ ॥उदयस्थासदा यस्यां हरिनक्तं ब्रतेतिथिरिति॥ अन्य
न त्तु संक्रांतिदावपि रात्रावेव॥ निषेधस्य दाग्रमासष्ठजाभोजने गोचरत्वेन वैधत्वाबाधकत्वात्॥
दिनद्वयव्याप्तौ परा॥ उदयो द्विशालिथ्योः प्रदोषव्यापिनी तिथिः॥ तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा
यतश्शिकालादर्शे जाबालिवचनात्॥ अन्यपक्षेतु एकभक्तवन्निर्णयः॥ अत्र विशेषो मदनरत्ने ग
रुडे॥ हविष्यभोजनं स्नानं सत्यमाहारलाघवं॥ अग्निकार्यमधः शय्यां नक्तभोजी षडाचरेत्॥ अ
ग्निकार्यं व्याहृतिहोमः॥ इति नक्तं॥ अयाचिते तु विशेषवचनाभावादुपवासवन्निर्णयः॥ अथैन

क्षत्रव्रतकालः॥ ॥विष्णुधर्मोत्तरे॥ उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः॥ युज्यते य
त्र तारा निशीथे शयनासु हेति॥ ॥माधवीये स्कांदे॥ तत्रैवोपवसेद्देवं निशीला दधो भवेत्॥
उपवासे यद्दंतस्यात्तद्दिनं नैकनक्तयोः॥ अथ व्रतपरिभाषा॥ तत्राधिकारिणो मदनरत्ने भवि
ग्न ष्ये॥ ॥अनंतयस्तु येविशाले पाऽत्रये विपायते॥ व्रतोपवासनियमैर्नानादानैस्तथान्ह्पेति॥
अनन्निग्रहणमुपवासविषयं॥ ॥अत एव देवलः॥ ॥आहिताग्निरनड्वांश्च ब्रह्मचा
री च ते त्रयः॥ अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नतां॥ एकादश्यं तु दौ नैच नत्व नोर क्ष्यामः॥
शूद्रस्याप्यधिकारः॥ ॥शूद्रो वर्णश्चतुर्थोपि वर्णो त्वा धर्ममर्हति॥ वेदमंत्रस्वधास्वाहा
वषट्कारादिभिर्विनेति व्यासोक्तेः॥ प्राच्यास्तु वैश्यशूद्रयोर्द्विरात्राद्योपवासनिषेधः॥ ॥वै
श्याशूद्रास्त्वयमोहादुपवासं प्रकुर्वते॥ त्रिरात्रं पंचरात्रं वा तेषां व्युष्टिर्न विद्यते॥ चतुर्थमक्तमेय
वैश्यशूद्रे विधीयते॥ त्रिरात्रं तु न धर्मज्ञैर्विहितं ब्रह्मवादिभिः॥ इति वचनादित्याहुः॥ पाद्मे तु तेनि
षेधाऽश्रुत्ये॥ ॥नतं तु निर्मूलमिति॥ ॥एवं स्त्रीणामपि॥ यत्तु स्कांदे॥ नास्ति स्त्रीणां पृथ
ग्यज्ञो न व्रतं नाप्युपोषणं॥ भर्तृशुश्रूषयैवैतां लोकानि ष्टान्व्रजंति वैहि॥ यद्वे वेभ्योपस्त्रापि श्रो
दिवेभ्योकुर्वर्तृलाभ्यर्चनं सेश्रियां च॥ तस्यां दुहे सा फलं न्यान्यचिक्कानां रिपुंहैं॥ भर्तृशुश्रूषणं एव॥
आदित्यपुराणे॥ नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा॥ विफलं तद्भवेत्तस्याः यत्करोत्यौर्ध्वदैहिकमि
ति॥ और्ध्वदैहिकं पारलौकिकमिति॥ तद्भर्त्रनुज्ञाविषयं॥ भार्यापत्युर्व्रतेनैव व्रतादिना चेरस

इति कालादर्शे सायनोक्तः॥ अत्र विशेषो हरिवंशे॥ स्नानं च कार्यं शिरसस्ततः फलमवाप्नुयात्॥ स्मृत्यंतरे
प्रातर्गृह्णीयप्रतीविसायतेसती॥ तथा॥ ॥ गृहीतौदुंबरपात्रं सकुशेसा... तथा॥ गोमूत्रं
गंदक्षिणेसिंच्य गृह्णीयाच्च तज्जलं॥ औदुंबरं ताम्रमयं॥ ततो मृत्सुः सनादधा...त्वा तस्य चतस्य
च॥ आत्मनश्चाभिषेक्तव्यं ततः शिरसि तज्जलं॥ उपवासेषु कर्तव्यमेतद्व्रतकेषु चेति॥ सर्वव्रतेषु
संकल्पश्च भारते॥ गृहीतौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः॥
॥ ॥ अथ व्रतारंभकालः॥ ॥ मदनरत्ने गर्ग्यः॥ अस्तंगते च गुरौ सुरे बाले वृद्धे मलिम्लुचे॥
उद्यापनमुपारंभं व्रता[illegible]नां नैव कारयेत्॥ रत्नमालायां॥ सोमसौम्यगुरुशुक्रवासराः सर्वकर्म
शुभं चेति सिद्धिदाः॥ भानौ भौमशनिसरेषु तु प्रोक्तमेव खलु कर्म सिध्यति॥ तथा॥ विरुद्धसंज्ञार
हये च योगास्तेषामनिष्टः खलु पाद आद्यः॥ सवैधृतिर्व्यतिपातनामा सर्वोप्यनिष्टः परिघस्य
चार्द्धं॥ तिस्रस्तु योगे प्रथमे सवज्रे व्याघातसंज्ञे नव पंच शूले॥ गंडेतिगंडे च षडेव नाड्यः शुभेषु का
र्येषु विवर्जनीयाः॥ संग्रहे॥ त्यागेऽग्निदिशयोरर्द्धं सप्तमीभूतलयोरथ॥ शुक्ले वेदे... भद्राप्रागपरं तु
पर्वयोः॥ श्रीपतिः॥ न सिद्धिमायाति तरां तं च विष्ट्यां विषाग्निघातादि मंत्रसिद्धं॥ ...सारसमुच्चये॥
दशम्यावष्टम्यां प्रथमघटिकापंचकपरं हृदि ...सप्तम्यो ... दशघटिकास्ते त्रिघटिकं॥ तृतीयाका
पौरवयमघटिकारव्यापरिमवं सुभं विष्टेः ... पुच्छः शिवतिथिचतुर्थीस्तु वीरमे॥ तत्रैव॥ सर्पिणी तु

शीतेपक्षेशुभेचैवतुदाम्भिका॥ सर्पिष्यात्तसुरवंसाज्यंदाम्भिक्याःशुद्धमेवच॥ माधवीये॥ विष्टिर्यं
दाहनीतिथेरपराह्णजाताहर्षोर्धजानिशिलदास्युमेदाउछे॥ व्रतपामले॥ दिनभद्रारात्रौरात्रिभ
द्रायदादिवा॥ नसाज्यास्तुभेकार्येषुमाकुरेवपुरातनाः॥ व्रतारंभेचविशेषोमदनरत्ने॥ सव्रतेनोत्ते॥
उदयस्यतिथिर्याहिनसवेदिनमध्यगा॥ सारवंडानाव्रतानांस्याद्दारंभश्चसमापनमिति॥ देवलः॥
ब्रह्मक्षमालराहारंस्नात्वाचम्यसमाहितः॥ सूर्यायदेवताभ्यश्चनिवेद्यव्रतमाचरेत्॥ मदनरत्ने
भविष्ये॥ ॥क्षमासत्यंदयादानंशौचमिंद्रियनिग्रहः॥ देवपूजाग्निहवनंसंतोषःस्तेयवर्जनं॥
सर्वव्रतेष्वयंधर्मःसामान्योदशधास्मृतः॥ अग्निहोमस्तुलेदेवसाः॥ व्याहृतिभिर्होवेतिवर्द्धमानः॥
यस्तुतेनोत्तं॥ सर्वपदंचैवव्हरणेतमवतव्रतपरं॥ व्रतांतरेतुभविष्येध्वंतरेसर्वेहोमोन्यथाने॥ अ
थएकादश्यांशिष्टानांहोमानांचरपामिति॥ जपहोमश्चेतिवद्व्यमाणेश्चैकवाक्यतेनास्यकाम्यव्र
तसमाप्तिपरत्वात्॥ नहितुसामान्यस्यपत्तुमित्रविदादिप्रकरणस्थेनैवतत्तद्व्रतविशेषहोमविधि
भिरस्योपसंहारइति॥ विष्णुधर्मे॥ तज्जप्यजपनोध्यानंतत्कथाश्रवणादिकं॥ तदर्चनंचतन्नामकी
र्तनश्रवणादयः॥ उपवासकृतामेतेगुणाःप्रोक्तामनीषिभिः॥ कौर्म्ये॥ वहियामाहजास्नातंपतितं
सूरजस्वलां॥ नस्पृशेनाभिभाषेतनेक्षेतव्रतवासरे॥ पृथ्वीचंद्रोदयेग्निपुराणे॥ स्नात्वाव्रतवतास
र्वेतेषुव्रतमूर्तयः॥ पूज्याःसुवर्णमय्यास्ताःशक्त्यावेश्मनिशायिनां॥ तयोर्होमश्चसामान्यंव्रतान्ते
दानमेवच॥ चतुर्विंशद्वादशवापंचवात्रयएववा॥ विप्राःपूज्यायथाशक्तितेभ्योदद्याच्चदक्षिणां॥

अत्र विप्रा इति पुंल्लिंगनिर्देशात्स्वरूपांस एव भ्यो भ्यां न तु स्त्रियः॥ एवं सहस्रभोजनादावपि॥ विरूपैकरो
पस्य प्रमाणांतरं विनायुक्तत्वात्॥ अत एव द्वयोर्यजमानयोः प्रतिपदं कुर्यात्॥ बहुभ्यो यजमानेभ्यः
रक्षादौ वित्तपशेषायोगो॥ सत्यभिः श्रायं द्वित्वं बहुत्वासंभवतीत्युक्तं चाचार्यैः पार्थसारथिना च॥ एतेनै
कस्य ब्राह्मणस्य बहुसाहस्रो जनं परास्तं॥ बहुत्वस्य एकपदश्रुत्या ब्राह्मणान्वितत्वे भोजनान्यथाभावा
दि अन्यत्र विस्तरः॥ शूद्रस्य तु प्रतिष्ठादिषु द्विप्रकाराव्याहृतिहोम इति॥ मंत्रानुक्तौ समस्तव्याहृतिरू
पो मंत्रः प्रजापतिश्च देवतेति कल्पतरुवर्द्धमानधृतदेवीपुराणे॥ होमो ग्रहादिषु जायां शतमष्टादिकं
भवेत्॥ अष्टाविंशतिरष्टौ वा यथाप्राप्ति विधीयते॥ मदनरत्ने॥ अनुक्तसंख्यायं यस्याष्टशतमष्टो
त्तरं शतं॥ वर्द्धमानधृतस्मृद्शातातपः॥ व्रतकृत्ये यो व्रतदेवताप्रतिमा॥ प्रतिमास्वरूपं च मदनरत्ने
भविष्ये॥ अनुक्तद्रव्यतसंख्यादेवताप्रतिमारूपं॥ सौवर्णी राजती ताम्री वृक्षजा मानुषी तथा॥
चित्रजापि च वेले छ्यानि जविनानुतपत्तः॥ आमावास्यापर्यंतं कर्त व्याबाध्यवर्जितैः॥ तत्रैव ब्राह्मे॥
आज्यद्रव्यमानादेशे तु होतिषु विधीयते॥ मंत्रस्य देवतायाः श्च प्रजापतिरिति स्थितिः॥ उपवा
सद्विजः स्वाततो ब्राह्मणभोजनं॥ तुर्यांते वास्य सद्गुणरूपवासेभिजायते॥ व्रतोद्यापनानु
क्तौ तु पृथ्वीचंद्रोदये॥ नंदीपुराणे॥ कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरितं॥ उद्यापनं विना य
त्तु तद्व्रतं निष्फलं भवेत्॥ यदि चोद्यापनोक्तं व्रतानुगुणतश्चरेत्॥ वित्तानुसारतो दद्यादनुक्तोद्या

पनेव्रती॥ गांश्चैव कांचनं दद्याद्व्रतस्य परिपूर्तये॥ सर्वेषामप्यलाभे तु यथोक्तकरणं विना॥ विप्रवा
क्यं स्मृतं पुंसां व्रतस्य परिपूर्तये॥ वृथा विप्रवचो यस्तु गृह्णाति मनुजः शुभं॥ अदत्वा दक्षिणां पापः
स याति नरकं ध्रुवं॥ ॥भारते॥ वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा॥ सर्वव्रतमयो दिष्टा भू
मिर्गावोथ कांचनं॥ वैजवापः॥ शिवनेत्रोद्भवं यस्माद्रजतं पितृवल्लभं॥ अमंगलं तद्यत्नेन देवका
र्येषु वर्जयेत्॥ देवीपुराणे॥ ॥व्रते च तीर्थेध्ययने श्राद्धेपि च विशेषतः॥ परान्नभोजनाद्देवि
यस्यान्नं तस्य तत्फलं॥ पृथ्वीचंद्रोदये ग्निपुराणे॥ निःस्त्रायामिताहारो गुरुदेवद्विजार्चकः॥ क्षा
रं क्षौद्रं च लवणं मधुमांसानि वर्जयेत्॥ क्षारास्तु तत्रैवोक्ताः॥ तिलमुद्गादृते शिम्ब्यं सस्यं गोधूम
कोद्रवौ॥ धान्यकं देवधान्यं च शमीधान्यं तथैव च॥ शिम्बिधान्यं तथा पण्यं मूषधान्यं क्षारसंस्मृतः॥
गो॥ धूमानां तु तत्रैव यवानां प्रतिपत्सवः॥ व्रीहिषष्टिकमुद्गाश्च कलायः सतिलं पयः॥ श्यामाकाश्चै
श्चैव नीवारा गोधूमाद्या हिते व्रताः॥ कूष्मांडं लाबुवार्ताकपालिकीज्योत्स्निकास्त्यजेत्॥ चतुर्भै
क्ष्यं सक्तुकणा शाकं दधि घृतं मधु॥ श्यामाकाः शालिनीवारा यावकं मूलं च तंडुलं॥ हविष्यव्रतनक्ता
दावग्निकार्यादिके हितं॥ मधुमांसे विहायान्यद्व्रतं वा हितमीरितमिति॥ शमीधान्यमाषादि॥ पा
लक्रीमध्यदेशे पोइ ति प्रसिद्धा॥ ज्योत्स्निका कोशातकी॥ मिताक्षरायां गौतमः॥ चरुभैक्ष्यसक्तु
कणयावकशाकपयोदधिघृतमूलफलोदकानि हविष्युत्तरोत्तरं प्रशस्तानि॥ पयोदधिघृतं
च गव्यमिति॥ अन्ये च विशेषा एकादशी चातुर्मास्यादिप्रकरणे वक्ष्यंते॥ ॥गृहीतम

व्रतत्यागेतुमदनरत्नेछागलेयः ॥ ॥ पूर्वंव्रतंगृहीत्वायोनाचरेत्काममोहितः ॥ जीवन्भवतिचां
डालोमृतःश्वाप्यभिजायते ॥ ॥ तत्रप्रायश्चित्तमुक्तं ॥ पृथ्वीचंद्रोदयेग्निपुराणेगारुडपुराणेच ॥
क्रोधात्प्रमादाल्लोभाद्वाव्रतभंगोभवेद्यदि ॥ दिनत्रयंनभुंजीतमुंडनंशिरसोथवा ॥ प्रायश्चित्ता
नादृतेकालव्रतानुष्ठानंनास्तीतिगम्यते ॥ अतिक्रांतमपिव्रतमितिकार्यंशूलपाणिः ॥ ॥ ए
तच्चशक्तविषयं ॥ अशक्तौतुकालिकामात्स्यपुराणांतरे ॥ उपवासेष्वसमर्थश्चेदेकंविप्रंतुभोजयेत् ॥
तावद्धनानिवादद्याद्यद्भक्तंस्याद्द्विगुणंतथा ॥ सुक्तःकृतभोजनः ॥ ब्राह्मणभोजनंविनेतिशेषः ॥ सहस्र
संमितांदेवीजपेद्वाप्राणसंयमान् ॥ कुर्याद्द्वादशसंख्याकायथाशक्त्यापरोनरः ॥ इतिमदनरत्नेवायवीये ॥
द्रव्यजातोपवासस्यफलंप्राप्नोत्यसंशयम् ॥ तथापरार्केदेवलः ॥ ब्रह्मचर्यंतथाशौचंसत्यमामिषवर्जनं ॥
व्रतेष्वेतानिचत्वारिवरिष्ठानीतिनिश्चयः ॥ मात्स्ये ॥ तस्मात्कृतोपवासेनस्नानमभ्यंगपूर्वकं ॥ वर्जनी
यंप्रयत्नेनरूपघ्नंतत्परंतप ॥ अन्यच्चनियमस्त्वत्रस्वव्रताचेषणीनयः ॥ ॥ अथस्त्रीव्रतेषुविशेषउच्य
ते ॥ तत्रहेमाद्रौव्रतकांडेगारुडे ॥ गंधालंकारतांबूलपुष्पमालानुलेपनं ॥ उपवासेनदुष्यंतिदंतधावनमं
जनमिति ॥ इदंचसभर्तृकोपवासविषयं ॥ अंजनंचसतांबूलंकुंकुमंरक्तवाससी ॥ धारयेत्सोपवासो
पिभर्तृरव्यंकरंयतः ॥ विधवायास्तिमार्गेलकुमारीवायदृष्टयेतितत्रैवभविष्योक्तेः ॥ तथाविधर्मे ॥ छ
सर्वभूतउपवासेष्वप्रमान्नाथतुवासिनी ॥ धारयेद्रक्तवस्त्राणिकुसुमानिसितानिच ॥ विधवास्तुशुक्लवसनमेव
मेवंनिधारयेत् ॥ रक्तंचचित्रवसनंधारयन्नरकंदापनं ॥ मत्तुरपि ॥ पुष्पालंकारवस्त्राणिगंधधूपानु
लेपनं ॥ उपवासेनदुष्यंतिदंतधावनमंजनं ॥ मदनरत्नेव्यासः ॥ दंतधावनपुष्पादिव्रतपस्यानुदुष्य
तीति ॥ यद्यपिइदंसर्वोपवासविषयंप्रतीयतेत[illegible]थापि ॥ शिष्टाचारात्सोभार्याद्यर्थंत्रिपमाणंच

१५

रात्रं त्रिरात्राद्युपवासविषयं ॥ नत्वेकादश्युपवासादिविषयं ॥ असकृज्जलपानाच्च मैथुनादिसपरार्के
देवलेन तन्निषेधात् ॥ सकृत्तांबूलचर्वणाच्च उपवासः प्रणश्येतादिवस्यापाच्च न क्षणं ॥ तच्चास्य
पुंस्त्रीविषयं तेन सावकाशतास्त्री णं तांबूलादिग्रासो नास्तीति वाच्यं ॥ तांबूलादिग्रासपक्षस्येवैकादश्या
न्तरविषयत्वेनैवपरासस्याप्रिस्तुबचसात् ॥ यत्तु हरिवंशे ॥ अंजनं रोचनं चैव गंधसुमनसस्त
था ॥ व्रते चैवोपवासस्य नित्यमेवं विवर्जयेत् ॥ शिरसोभ्यंजनं सोम्यं नेवमेतत्प्रशस्यते ॥ न पाद
योर्नेगात्रस्य स्नेहेनेति निस्थितिस्मृतेस्तिलत्रैचो उपवासव्रतकविषयं ॥ तत्तु सर्वेषां सर्वेषां च विरोधा
दिति मदनरत्नेरुक्तं ॥ तत्रैव ॥ अश्रुपातो शेषव्रतकस्य हस्य हंतीत्तथा ॥ उपवासाद्युत्याभ्यादि
सद्योत्रशयतिस्त्रियं ॥ स्त्रियमिष्टोपलक्षणं ॥ मदनरत्नेशिवधर्मे ॥ स्नानं व्रतानियमासानं ध्या
नं चतुर्लतप ॥ पत्नेनापि कृतं सर्वं कोधिनस्य वृथा भवेत् ॥ ॥ अथ सूतकादौ निर्णयः ॥ ॥
नत्रशावसूतकाशौचयोः सर्वस्मात्कर्मणि लिटत्तिर्निबंधेषु स्पष्टैवगोजास्त्रक्षभावपितामातुः ॥ जात
र्वं क्षये जातं नित्यकर्मनचारयेत् ॥ नैमित्तिकं च तदधः स्नवद्रक्तेन चा चरेत् ॥ जातके तु सप्तसस्ने
र कर्मणि मैथुने ॥ धर्मोद्धारेल धावोतेनित्यं नित्यकर्मणि संसजेत् ॥ द्रव्येषु शुद्धे द्विजाले चनैव स्वं कापि किंच
न ॥ कर्मकुर्यान्न रोगितःसूतके मृतके तथेति कालीपुराणात् ॥ वस्तुतस्तु सर्वदेवीधर्मोपक्रमात्मा
ष त्रर्दियत मस्यत्तिषु स्वंचेति मा ॥ तथाहे माद्रेपाध्ये ॥ गर्भिणी स्नातिकादिश्च कुमारी वायरोगिणः ॥ य
म दाशुद्धा तदान्येन कारयेद्रु तरस्वयैति ॥ पुंसोप्येष विषयः ॥ लिंगस्यावीच्छ्वाल लात् ॥ नेन यस्मिन्व्र
ते हृज्या युक्तं दन्येन कारयेत् ॥ शारीरं नियमान्स्वयं कुर्यादिति हेमाद्रिर्व्यासः स्वरेव्यानव्रतानां व्रतद्गतिवि
श्रुतेभ्य ॥ आरंभस्तन भवेसेव ॥ शुद्धिं तलेविष्णुः ॥ बहुकालिकसंकल्पोग्रहीत शबुरायभि ॥ स्तत

केम्हतवेच्चैव व्रततन्नैव दुष्यति ॥ एतत्काम्यपरं ॥ नित्यं तु नारब्धमपि कार्यमिति गौडाः ॥ मदनरत्ने ॥ पूर्वं
संकल्पितं कृच्छ्रं तत्तं सूचियतव्रतैः ॥ तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितम् ॥ माधवीये कौर्मे ॥ काम्यो
पवासं प्रक्रांतेत्वंतरामृतसूतके ॥ तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितमिति ॥ एतेन सांगोपि का
र्यो नांगदेवपूजादिकार्मीयेवे तिवर्द्धमानोक्तिः प्रशस्ता ॥ नवरात्रे तु तत्रैव ॥ विशेषो वक्ष्यमाणः ॥ एवं रज
स्वलादियत्नसहव्रतः ॥ प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ॥ न तत्रापि व्रतस्य स्यादुपरोधः क
दाचनेति ॥ तत्प्रतिनिधिना कारयेदित्युक्तेस्तरम् ॥ तदुक्तं मदनरत्ने मात्स्ये ॥ अंतरा तु रजोयोगे पूजाम
न्येन कारयेदिति ॥ प्रतिनिधयश्चानिर्णयामृते पैठीनसिः ॥ भार्या पत्नुव्रतं कुर्याद्भार्यायाश्च पतिव्रतं ॥
असामर्थ्ये परस्ताभ्यां व्रतभंगो न विद्यते ॥ स्कांदेपि ॥ पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ॥ ए
षामभावे एवान्यं ब्राह्मणं वा नियोजयेत् ॥ कात्यायनः ॥ पितृमातृभ्रातृपतिपत्न्यर्थे च विशेषतः ॥
उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत् ॥ मातामहादिनुद्दिश्य एकादश्यामुपोषणे ॥ कृते तु फलं विधास्सः
समप्रसमवाप्नुयुः ॥ मदनरत्ने प्रभासखंडे ॥ भर्त्ता पुत्रः पुरोधाश्च भ्राता पत्नी सुखवापि च ॥ यात्रायां धर्म
कार्येषु जायते प्रतिहस्तकाः ॥ एभिः कृतं महादेवी स्वयमेव कृतं भवेत् ॥ तत्रैव वायवीये ॥ स्वयं कर्तुम
शक्तश्चेत्कारयीत पुरोधसा ॥ इदं च सर्ववर्णसाधारणम् ॥ अविशेषाद्यत्तु कश्चिदाह ॥ शूद्रस्य ब्राह्म
णादिरेव प्रतिनिधिर्युक्तो न शूद्रः ॥ जपस्तपस्तीर्थसेवा प्रव्रज्या मंत्रसाधनं ॥ विप्रैः संपादितं यस्य संप
न्नं तस्य तत्फलमिति मरीचिवचनादिति तन्नुच्छं ॥ प्रव्रज्यादीनां शूद्रं संप्रत्यप्राप्तेः प्रायश्चित्तदर्शना
दितिन्यायेनास्य ब्राह्मणादिगोचरत्वात् ॥ यदा तु ॥ उपवासो व्रतं होमस्तीर्थस्नानजपादिकमिति शूद्रं
प्राक् तदापि स एव दोषः ॥ स्त्री शूद्रपतनानि षड् इतिमानवीये जपनिषेधात् ॥ ब्राह्मणो हीनवर्णस्य

यः कुर्यात्कर्म किंचन॥ संतोषजं जातिपयामोति इहलोके परत्र चेति काण्वरमाद्रोमरास्थिवचनं
न्निषेधाच्च॥ वस्तुतस्तु॥ संकर्णता वचनमात्रंमत्रोच्यत इति प्रतिनिषेधः कालनस्तु॥ अत्र
विशेषमाह त्रिकांडमंडनः॥ काम्यप्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः॥ काम्येष्वप्युपक्रमादू
र्ध्वं केचित्प्रतिनिधिं विदुः॥ नास्याः प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु॥ स देशकालयोर्नास्ति
नारणेरग्निरेव सः॥ नापि प्रतिविधातव्यं निषिद्धं यस्तु कर्हिचित्॥ ॥हिरण्यकेशीसूत्रेपि॥
नि न स्वामिनस्य भार्यायाः पुत्रस्यादेशस्य कालस्याग्नेः देवतायाः कर्मणः शब्दस्य प्रतिनिधिः
विद्यत इति॥ ॥अथ व्रतादिसंपाते निर्णयः॥ ॥तत्र तिथिद्वयसंन्निपाते तत्रौक्तं
दानहोमादिकं तन्त्रेणानुष्ठेयं॥ अविरोधात्॥ यत्र तु नक्तैकभक्तादौ विरोधस्तत्र भास्यमादेकभक्तं
कार्यं॥ न त्रुतुर्थे पूर्वं हुस्तति योगो वा काले कार्यं॥ समकालानविरुद्धव्रतादौ लक्के स्वयं कृत्वान्यद्भार्या
दिना कारयेदिति माधवः॥ यत्र तु शिवरात्र्यादौ तिथिमध्ये पारणं सायां नृसिंहो जनमात्रं॥ नुतावष्ट
म्योर्दिवा तु कार्या श्रैवहाचपर्वणि॥ एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत्॥ इति तन्निषेधाच्च॥
तत्र पारणायां वैधत्वादिवैव भोजनं॥ निषेधस्तु रागप्राप्तभोजनविषयः॥ एवमष्टम्यादि
नक्तव्रते संक्रांत्यादौ रवौ संकष्टचतुर्थीं चरात्रौ भोजनं॥ यत्र तु ष्टम्यादौ दिवा दिवा तु जानि
षेधः॥ संक्रमे च रात्राविति निषेधद्वयं॥ तत्रोपवास एव कार्यः॥ यद्यपि पुत्रिणा सुपवासोपि
निषिद्धस्तथाप्युपवासनिषेधे तु भक्ष्यात्किंचित्सकलमयेदिति वचनात्किंचिद्भक्ष्य लोपवासः
कार्यः॥ चांद्रायणमध्ये एकादश्यादौ तु भोजनं कार्यमेव॥ चांद्रायणस्य काम्यत्वेन निसवा १६

धकत्वात्॥ अबाधेन गतस्य संभवाच्च एकादश्यामेकांतरोपवासादिपारणायां जलपार
णं तु तोयोपवासेन॥ आपो वा अशितमनशितं चेति श्रुतेः॥ एवं द्वादश्यां मासोपवासश्च॥ श्रा
द्धप्रदोषादिष्वपि ऊह्यम्॥ एवं काम्यनैमित्तिकनिषेधादिकं तत्तद्बलाबलं स्वयमूह्यमिति दिक्॥
॥छ॥ ॥इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ परिभाषा समाप्ता॥ ॥अथ प्रतिपदादि
सामान्यतिथिनिर्णयः॥ ॥शुक्लप्रतिपदपराह्णव्यापिनी पूर्वा ग्राह्या द्युम्नवाक्यात्॥ प्र
तिपत्सम्मुखी कार्या या भवेदपराह्णिकीति स्कान्दोक्तेः॥ शुक्लास्यास्तु प्रतिपत्तिथिः प्रथमेऽह्न
सापराह्णे भवेदिति॥ दीपिकोक्तेः [illegible] दिने चतुर्थभागः॥ तदभावे सायाह्नव्या
पिनी ग्राह्या॥ तदभावे तु सायाह्नव्यापिनी परिगृह्यतामिति माधवोक्तेः॥ कृष्णा तु परा॥ व्या
त्तरतो रविलेति दीपिकोक्तेः॥ कृष्णा तु पूर्वैरासहनंतभट्टः॥ सर्वे तिथिषु वर्ज्यान्युक्तानि स्मृ
दीपिकायां॥ कूष्मांडं बृहती फलानि लवणं चैव वर्ज्यानि तालानां न यातेलं च यामलकं प्रवसत्सनशीर्षं कपा
लं त्रपु॥ निंबं चाम्रमसूरिकान्न फलमथो रेताक संसं मधु॥ द्यूतं स्त्रीमृगनं अमावास्या प्रतिपदादि
ध्रुवमाषोडशा॥ शीर्षं नारिकेलं॥ कपालमालाबु॥ अन्त्रं पिजोलं॥ भूपाल॥ कूष्मांडं बृहती क्षा
रं मूलकं पनसं फलं॥ धात्री शीर्षः कपालोऽन्त्र नखचर्म तिलानि च॥ क्षुरकर्मांगनासेवा प्रतिप
त्प्रभृति त्यजेत्॥ नखं शिंबि॥ चर्म मसूरिका॥ द्वितीया तु कृष्णा पूर्वा शुक्लोत्तरेति हेमाद्रिः॥ कृष्ण
द्वितीयादिमा पूर्वा ह्येयदि सास्तिना नु परतः सर्वे पि दीपिकोक्तेः॥ माधवानंतभट्टमते तु सर्वापि

द्वितीयापरा॥ तथा च माधवः॥ सर्वेष्वपि संनिपातः परे हि मुहूर्तगः॥ सा द्वितीया परोपोष्या सर्वे
विद्वान्ततोन्यथेति॥ तृतीया तु सर्वमते रंभाव्यतिरिक्ता परैव तेन युग्मवाक्यं रंभाव्रतविषयंम॥
रंभाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम॥ अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यतइति
ब्रह्मवैवर्तोक्त॥ गौरीव्रते तु विशेषमाह माधवः॥ मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे॥ शुक्ला
धिकायामप्येवं गणयोगप्रशंसनादिति॥ चतुर्थ्यपि सर्वमते गणेशव्रतव्यतिरिक्ता परैव युग्म
वाक्यात्॥ एकादशी तथा षष्ठी अमावास्या चतुर्थिका॥ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता
या इति निर्णयामृते माधवीये चोक्तं॥ युगमध्यादिने यत्र तयोपोष्य फला स्वरात्॥ द्वारे णाख्या
यपंचम्यां भजयेत्तु यतो नरः॥ विषाणि तस्य नश्यंति तिलग्नाहिं संतीति पंक्तगाः इति माधवीये देवलो पु
क्ते॥ युगं चतुर्थ्या॥ पूर्वत्र मध्याह्ने व्याप्तौ सर्वा॥ अन्यपक्षे परैव॥ पंचम्या प्रयोक्ते:॥ गणेशव्र
ते तु तृतीयायुतैव॥ चतुर्थी तृतीयायां महापुण्यफलप्रदा॥ कर्तव्या व्रतिभिर्विप्र गणनाथसु
लु तोषिणी इति हेमाद्रौ ब्रह्मवैवर्तोक्तेः॥ माधवीये गणेशव्रते मध्याह्नव्यापिनी मुख्या॥ चतुर्थी गण
नाथस्य मातृविद्धा प्रशस्यते॥ मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनीति बृहस्पतिवचनात्॥
प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप इति तत्कालाभिधानाच्च॥ तेन परदिने सत्वे परा॥ अन्यथा
कृच पूर्वेत्युक्तं वस्तुतस्तु॥ यत्र॥ भाद्रपदशुक्लचतुर्थ्यादौ गणेशव्रतविशेषे मध्याह्नपूजोक्ता तद्विषयाण्येव
प्रागुक्तवचनानि न तु सार्वत्रिकाणि॥ संकष्टचतुर्थ्यादौ बहूनां कर्मकालानां बाधापत्तेः॥ तेन स

र्वत्र गणेशव्रते पूर्वैवेति सिद्धं ॥ संकष्टचतुर्थ्यां तु चंद्रोदयव्यापिनी ग्राह्या ॥ दिनद्वये सत्त्वे मा
ग २ तृयोगस्य सत्वात्पूर्वैवेति केचित् ॥ अन्ये तु दिने मुहूर्तत्रयादिरूपस्य तृतीयायोगस्याभावात्परदिने
माधवोक्तमध्यान्हव्यापित्वात्संकष्टणे तु चंद्रोदये यदा तस्याद्युदिवापि दिनद्वयं ॥ प्रदोषव्यापिनी
या ह्याश्चतुर्थ्यः संकष्टव्रते ॥ दिनद्वयेपि वर्तेत चतुर्थ्यां यावि चूदये ॥ परैव व्रतिभिः कार्या गणना
थ परायुणेरिति स्कांदवचनात्परेत्याचक्षते ॥ दिनद्वयेपि तदभावे तु परैव ॥ गौरीव्रते पूर्वैव ॥
गणेशगौरीरंवबलाव्यतिरिक्ता प्रकीर्तिता ॥ चतुर्थ्यां पंचमीविद्धा देवतांतरयोगरतिमदनरत्ने
ब्रह्मवैवर्तात् ॥ पंचमी तु माधवमते सर्वापि पूर्वा ॥ चतुर्थ्यां संयुता कार्या पंचमी परया न तु ॥ दैवे कर्म
णि पित्र्ये च शुक्लपक्षे तथासिते इति हारीतोक्तेः ॥ कृष्णनक्तहारीतोक्तेरुपवासविषयात् ॥ प्रतिप
संचमी चैव सावित्री भूतपौर्णिमा ॥ नवमी दशमी चैव नोपोष्याः परसंयुता इति ब्रह्मवैवर्तात् ॥
७ यत्तु एतद्व्रतस्कंदे ॥ स्कंदोपवासो ह्येव कार्या पंचमी रससंयुतेति वाक्यशेषाद्दिमाध्वरः ॥ पंचमी तु ति
प्रकर्तव्या षष्ठ्या युक्ता तु नारद ॥ इत्तावत्ततवीयं तन्नागपूजा ॥ विषयमित्युक्तेने भट्टनिर्णयामृतादि
यः ॥ चमत्कारचिंतामणौ च पंचमि नागपूजायां कार्या षष्ठी समन्विता ॥ तस्याल्तु षिता नागा
इतरा सा चतुर्थिकेति ॥ ॥ तेन नागपूजादौ परैव ॥ यत्तु मदनरत्ने दिवोदासीयेयो ॥ श्राव
णामं चम्यतिरिक्ता पूर्वैवेत्युक्तं ॥ श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी ॥ तां परित्यज्य पंचम्यां
चतुर्थ्यां सहिता हि तेति संग्रहोक्तेः ॥ गणेशस्कंदयोगाभ्यां मानागाः शुभाः शुभाः ॥ मिश्राभि

व्रतयोः पत्रे नागानागारवु बर्हिणाविति षट्त्रिंशन्मतास्त्र॥ श्रावणे पंचम्यां रितिक्त नाग पंचम्याच
तुर्थ्युतन्तमुक्तं लङ्घ पवासादि विषयं॥ पत्रे वाहनी षष्ठी सर्व मते तत्स्कंदे [illegible] व्रतातिरिक्तापरे व॥
युग्मवाक्यात्॥ नाग विद्धा न कर्तव्या षष्ठी चैव कदाचनेति॥ स्कांदात्॥ सप्तमी पूर्वैव युग्म वाक्यात्॥
षष्ठ्याप्युता तत्सर्वदेति स्कांदे॥ षष्ठी च सप्तमी चैव वारश्चेदंशुमालिनः॥ योगोयं पद्मको नाम सूर्य
ग्रहैः कोटिसम [illegible]॥ अष्टमी तु सर्वमते कृष्णा पूर्वा शिवा ता परा॥ व्रत मात्रेष्टमी कृष्णा पूर्वा शुक्लाष्टमी प
देति माधवोक्तेः॥ परस्तु शुक्लाष्टमी पूर्वेयुस्तु अष्टमेति दीपिकोक्तेः॥ शिवशक्ति महोत्सवेषु कृष्णा शुच
र॥ पक्षद्वयेस्तु नरैर्वशी वराग्नि मतोत्सवे तिर माधवोक्तेः॥ दिवोदासीये त्वेवं विध्येः॥ ॥य
दा यदा शितानष्टम्यां बुधवारो भवेत्क्वचित्॥ तदा नदाहि सा ग्राह्या एकभक्ताशनेन्दुपा॥ संध्या
ग्रे काले तं अग्रसुते जनार्दन॥ बुधाष्टमी नकर्तव्या हंति पुण्यं पुराकृतं॥ नवमी तु सर्वमते पूर्वा यु
ग्म वाक्यात्॥ नकुर्यान्नवमी तात दशम्या तु कदाचनेति स्कांदात्॥ दशमी तु पूर्वा परा वेति हेमा
द्रिः॥ स्वल्पा पूर्वोत्तरा स्तु शुक्ल दशम्येव व्यवस्थितेति माधवः॥ वस्तुतस्तु स्वल्पानवमी युतैव ग्रा
ह्या॥ दशमी तु न कर्तव्या सद्वर्गा हि जन्मनेत्यापस्तंबोक्तेः॥ यत्तु॥ संपूर्णे दशमी कार्या पूर्वया
तं परया थवेति गिरसोक्तं नवमी तु कालाभेजोदधिकी ग्राह्येत्येव ज्ञेयः॥ ॥अथैकादशी नि
र्णयः॥ तत्रैकादश्युपवासो द्वेधा॥ निषेध परिपालनात् [illegible] सकाम व्रत रूपश्च॥ तत्राद्यः॥ न शं
खेन पिबेत्तोयं न खादेत्कूर्म सूकरौ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपीति॥ ॥कौर्मे

देवलाद्युक्तेः॥ आग्निपुराणेपि॥ गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च॥ एकादश्यां न भुं
तपक्षयोरुभयोरपि॥ इति नञा पर्युदासेन व्रतविधिः॥ तच्चैत्तु व्रतादिशब्दाभावात्॥ व्र
तत्पत्वं ब्रह्मवैवर्ते॥ मासे हरिदिने सम्यग्विधायानियमं द्विज॥ दशम्यामुपवासस्य प्रकुर्याद्वै
अवमिति॥ रुद्रद्यशिवभक्ताद्यैरपि कार्यं॥ वैष्णवो वाथ शैवो वा कुर्यादेकादश्यांशी व्रतमिति शिव
धर्मोक्तेः॥ वैष्णवो वाथ शैवो वा सौर प्येतत्समाचरेदिति सौरपुराणाच्च॥ सोपि द्वेधा॥ नित्यं का
म्यं च तत्र पौष्येकादशी नित्यं पक्षयोरुभयोरपीति गारुडोक्तेः॥ पक्षे पक्षे च कर्तव्यमेकादश्यामु
पोषणं॥ इति नारदोक्तेश्च नित्यता॥ यदिच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः॥ एकादश्यां
न भुंजीत पक्षयोरुभयोरपीति कौर्मादिषु फलश्रुतेश्च काम्यता॥ तच्चैकादशीव्रतं च गृहस्था
तिरिक्तानामेव नित्यं॥ गृहस्थस्य तु शुक्लायामेव व्रतं नित्यं॥ न कृष्णायां॥ एकादश्यां न भुंजी
त पक्षयोरुभयोरपि॥ वनस्थयतिधर्मोयं शुक्लामेव सदा गृही॥ इति देवलोक्तेः॥ न चानेन नि
षेधपालनमेव वनस्थयतिविषय उपसंह्रियते॥ न तु व्रतमिति वाच्यं॥ अस्य पर्युदासेन व्रतवि
धिपरत्वात्॥ अन्यथा पूर्वोक्ताग्निपुराणवचनात्॥ निषेधपालने गृहस्थस्याधिकारोक्त्या
विरोधः स्यात्॥ निषेधस्य निवृत्तिमात्रफलत्वेन विशेषाणपेक्षणादुपसंहारायोगात्॥ अभा
वस्याधर्मत्वाभावाच्च॥ निवृत्तिमात्रफलत्वेन विशेषेणानपेक्षणादुपसंहारायोगात्॥ अ
भावस्याधर्मत्वात् तस्मादनेन सर्वमेकादशीव्रतविधायिनां सामान्यवाक्यानां वनस्थयतिवि

१२ द्वादशी मे सदा प्रिया ॥ शुक्ला गृहस्थैः कर्त्तव्या पोगसंतानवर्द्धिनी ॥ शुक्लामिस्तथा कृष्णा

पयेत उपसंहारान्न गृहस्थस्य कृष्णायां निराकरणप्राप्तिः ॥ कथं तर्हि संक्रांत्याद्युपसंहरे एकादशी वा
सरे ॥ चंद्रसूर्यग्रहे चैव न भुंजीत गृही वानप्रस्थ इति नारदादि वचने कृष्णानिषेधः ॥ मास्य मावा
कृ.षा दि तिथिरेव ॥ श्रूयताम् ॥ शयनी बोधनी मध्ये या कृष्णैकादशी भवेत् ॥ सैवोपोष्या गृहस्थे
न नान्या कृष्णा च नेति पाद्मे ॥ गृहस्थस्य आषाढीकार्त्तिकीमध्यस्थ पा कृष्णाविहिता सा उप
वलो निषिध्यते ॥ अन्यकृष्णायां तु न विधिः ॥ सर्वविधीनां चरमिस्तनंतभट्टहेमाद्र्यादिग्रंथाः ॥
दीपिकायां ॥ असिता तु शयनी बोधातरस्या पक्षयो न स्यात् तास्मजिनो पिति ॥ मदनरत्ने भवि
ष्ये ॥ यथा शुक्ला तथा कृष्णा न भेदे ते लोप दर्शितेति ॥ निषेधपालनं काम्यव्रते च सर्व कृष्णा वा
सर्वे गृहीनां भवसेव ॥ पुत्रवांश्च सभार्यश्च बंधुयुक्तस्तथैव च ॥ उभयोः काम्यव्रतं कुर्यात्तु
वैष्णवमिति नारदोक्तेः ॥ एतच्च सर्वं कालादर्शे ॥ विधवाया वनस्थस्य यतेश्चैकाद
शीद्वये ॥ उपवासो गृहस्थस्य शुक्लायामेव पुत्रिणः ॥ संजेर्निषेधः कृष्णायां सिद्धिलस्य [illegible] त
लोपते इति ॥ माध्यायास्तु वैष्णवगृहस्थानां कृष्णापि ॥ निर्दिश भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ॥ पक्षे
पक्षे च कर्त्तव्यामेकादश्यामुपोषणं ॥ सपुत्रस्सभार्यश्च स्वजनो भक्तिसंयुतः ॥ एकादश्यामुपव
सेत्पक्षयोरुभयोरपीति नारदोक्तेरिसाहुः ॥ पुत्रशब्दाश्चापसमात्रवचनः ॥ नारायणवृत्तौ
पुमांस एव मे वश्या जायेरं निपत्रापत्यमात्रवाचिनो [illegible] ॥ जनयेय बहुपुत्राणां मंत्रवचनलिं
गा [illegible] ॥ पुमान्पुत्रो जायतेर इति मंत्रे च ॥ उपवासेन निषेधो विशेषो वा यवायो ॥ ॥ उक्तं ॥ उपवा
१२

सन्निषिद्धं तु भक्ष्यं किंचित्प्रकल्पयेत् ॥ न दुष्यत्युपवासेन उपवासफलं लभेत् ॥ भक्ष्यं चैतत्रै
वोक्तं ॥ नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथाम्बु चाज्यं ॥ यत्पंचगव्यं यदि वापि
वायुः प्रशस्तमत्रोत्तरमुत्तरं च ॥ ॥ तत्र दशमीवेधो द्विधा ॥ अरुणोदयवेधः ॥
सूर्योदयवेधश्चेति ॥ आद्यो गारुडे ॥ दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ॥ नैवोपोष्यं
वैष्णवेन तद्दिनैकादशीव्रतमिति ॥ अरुणोदयस्वरूपं च माधवीये स्कांदे ॥ ॥ उदया
त्प्राक् चतस्रस्तु घटिका अरुणोदय उच्यते ॥ यदपि ॥ उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता ॥ सं
पूर्णैकादशी नाम तत्रैवोपवसेद्गृही इति ॥ गारुडे सर्वधर्मोक्तिवचनात् ॥ यच्च भविष्ये ॥
आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता ॥ एकादशी तु संपूर्णा विद्धान्या परिकीर्ति
तेति तदप्युपसंहारन्यायेन दंडचतुष्टयपरमेव ॥ हेमाद्रौ वाक्ये ॥ यत्तु ब्रह्मवैवर्ते ॥
चतस्रो घटिकाः प्रातररुणोदयनिश्चयः ॥ चतुष्टयविभागोऽस्य वेधादीनां किलोदितः ॥ अरु
णोदयवेधस्यात्सार्द्धं तु घटिकात्रयं ॥ अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः ॥ महावेधोऽपि
तत्रैव दृश्यतेऽर्को न दृश्यते ॥ तुरीयस्तत्र विहितो योगः सूर्योदये बुधैः ॥ इति तदप्यवयवद्वारा
तद्देशीयवेधविशेषपरमेवेति माधवीये मदनरत्ने च ॥ अथ सूर्योदयवेधः ॥ तत्रापि हेमाद्रौ
माधवीये च गारुडे ॥ उदयात्प्राक् त्रिघटिकाव्यापिन्येकादशी यदा ॥ संदिग्धैकादशी
नाम वर्जयेद्धर्मकांक्षिभिः ॥ उदयात्प्राङ्मुहूर्तेन व्यापिन्येकादशी यदा ॥ संयुक्तैकादशी नाम

२ पद्यैररुणोदयोक्तः॥ निशः प्रांते तु यामार्द्धे देवादिप्रबोधने॥ सारस्वतान धेऽचारुणो २

वर्जयेद्धर्मवांछिभिः॥ तथाऽरुणोदयेऽप्युत्पद्यते॥ तत्र चतस्रो घटिकाः प्रातररुणोद
य इष्यत इति स्कांदोक्तेः॥ हेमाद्रौ नारदेरंहोषेममार्गोदय उच्यते इति स्मृतेः॥ अत्रैव॥ एषांस
र्वपक्षाणां मुहूर्तद्वयेन कोटिकाराग्निशः प्रांते इति वचनाद्वरात्रिमान वशात्सार्द्धत्रिदंडा
द्यो नेकेऽरुणोदयः॥ तदाह हेमाद्रिः॥ सार्द्धघटिकात्रयो न्तिरस्याः घटिकमानरात्रिविषय॥ त्रिंशति ४
महत्तरास्तु रात्रिरपेक्ष्ये चतस्रो घटिका इत्युमिसाह॥ तन्न॥ अरुणोदयशब्दस्यानेकका
र्थत्वापत्तेः॥ तत्र मुहूर्तद्वयमर्थः॥ दंडद्वयैकमुहूर्तादिवेधानां तथाप्यनुपपत्तेः॥ नहि तेषां
यामार्द्धवरुणोदयत्वं चास्ति॥ मुहूर्तद्वयस्य यामार्द्धस्य च चतस्रो घटिका इत्यनेनोपसंहार
च॥ न तदर्थः॥ न च सार्द्धं तु घटिकात्रयमित्यनेनापि तदापत्तिः कथ्या॥ तेन चतुर्दंडवेधस्ये
वोक्तेः॥ चतुर्दंडैर्दघटिका दशमी सत्वे हि वेधस्तदर्थः॥ द्विघटिकादौ तदयोगाच्च॥ यत्तु मतं॥
क्रियत्तारुणोदयवेध इत्यपेक्षायां सार्द्धघटिकात्रयनियमारुणोदयः॥ घटिकांतो न्यूने द
शमी सत्वे॥ न दोष इति तत्तुच्छं॥ द्विदंडादावपि तदापत्तेः॥ दशमीशेषसंयुक्तो यदि स्यादरुणो
दयः॥ नैव पोष्यं वैष्णवेन तत्र हि नैदशीव्रतमिति गारुडे भविष्ये च॥ योगमात्रेण निषेधात्॥
नारदीयेपि॥ लववेधेपि विप्रेंद्र दशम्येकादशी त्यजेत्॥ सुराया बिंदुना स्पृष्टं गंगांभ इव निर्मलं॥
स्कांदेपि॥ कलाकाष्ठादिवेधेन रस्यते दशमी विभो॥ एकादश्यां न कर्तव्यं व्रतं राजन् कदा
चन इति॥ निगमेपि॥ सर्वप्रकारवेधोयमुपवासस्य दूषक इति॥ अत एव माधवीये॥ ना

रुणोदयाद्यदं उत्स्वदशमी स्पर्शसंयुक्ता स्तत्घटियोगे संदिग्धा मुहूर्ते व्याप्तौ संयुक्ता उदयसंकी
र्णसंक्ता॥ अरुणोदयवेधायां दशमी यदि संस्थिता॥ संदृष्टैकादशी तां तु मोहिन्यै दत्तवान्प्रभुरि
ति गोभिलोक्तेः॥ पूर्वोक्तगारुडादेश्च सामान्यतो विशेषतश्चारुणोदयवेधो निषिद्धः॥ यत्तु स
मभागे रुणोदय इति हेमाद्रिणोक्तं॥ यच्च महत्तरा रात्रिरिति धर्मं तत्स्वयमेव दूषितः॥ अतो तेषूक्तं॥
वेधतारतम्यं च दोषतारतम्यादुपपद्यत इति॥ दोषतारतम्यं च प्रायश्चित्ततारतम्यादवगम्यते॥
तच्चोक्तं हेमाद्रौ स्कंदमन्वंतरे॥ अज्ञानाद्यदि वा मोहात्कुर्वन्नेकादशीं नरः॥ दशमीशेषसंयुक्तां
प्रायश्चित्तमिदं चरेत्॥ एकपादं नरश्चैव गां चैव दद्यात्सवत्सकां॥ सुवर्णस्यार्धकं देयं तिल
द्रोणसमन्वितं॥ वेधांतरे न चैव॥ ब्राह्मणान्भोजयेत्त्रिंशद्गां च दद्यात्सवत्सिकां॥ सुवर्णस्यार्धकं
देयं तिलद्रोणमथापि वेत्॥ अत्र वेधतारतम्याद्ज्ञानंतरं दशमीप्रवेशे त्वरुणोदयवेधयुक्तो भव
ति॥ अस्योपि तस्मैव कलौ नोक्तः॥ उदयोपरि विद्धा तु दशम्यैकादशी यदा॥ दानवेभ्यः प्रीणनार्थं
दत्तवान्पाकशासन इति॥ स्कंदेतरेपि॥ दशम्याः शेषमादाय यदोदेति दिवाकरः॥ तेन स्पृष्टं ह
रिदिनं दत्तं जंभासुराय हीति॥ तत्रारुणोदयवेधो वैष्णवविषयः॥ तद्वाक्येषु वैष्णवग्रहणात्॥
न तत्स्वरूपमाधवीये स्कांदे॥ पंचरात्रविदो वैष्णवदीक्षां वैखानसादियागमोक्तदीक्षां शाक्तोहि वैष्णवः॥
परमापदमापन्नो हर्षे वा समुपस्थिते॥ नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ समात्मा

सर्वभूतेषु निजाचारादविच्युतः॥ विध्वस्तापिलाविलाचारः सति चैव वैष्णवउच्यते इति॥ विष्णुधर्मे॥
नचलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे॥ नहरति नच हंति किंचिदुच्चैः सि-
तमनसं तमवेहि विष्णुभक्तमिति॥ यथादिपिनादे रागमदीक्षायोः स्मार्तस्यैव वैष्णवत्वं नन्तुप्र-
न्रदेन तथापि स्वपारंपर्यप्रसिद्धमेव वैष्णवत्वं स्मार्तत्वं च मन्यते वृद्धाः॥ तत्र सारे भविष्ये॥ यथा
शुक्लास्तथा कृष्णा यथा कृष्णास्तथेतरा॥ तुल्यतेन मन्यते यस्तु सवै वैष्णवउच्यते॥ केचित्तु दशम्यां
नवमीवेधमपि सहजंति॥ तन्नमूलं मन्य उदयः वेधस्तु परिशेषात्स्मार्तगोचरः॥ तदाह मा-
धवः॥ अरुणोदयवेधो वेधः सूर्योदये तथा॥ उक्तो द्वौ दशमीवेधौ वैष्णवः स्मार्तयोः क्रमात्॥
नारदेन तु दशम्या नवभेदाः प्रउक्ताः॥ ॥ छायाद्यानवभेदाये तासु पोष्यं तु राधमाः॥
सर्वेपि ब्राह्मणाद्याश्च योन्यंतरमवाप्नुयात्॥ नवभेदानां लक्षणं ब्रुते नेवोक्तं॥ ॥ नारदः॥
श्रूयतां द्विजशार्दूल आवेधायै नवधाये नवधास्मृताः॥ येत्स्यत्तेस्तत्तु ग्निश्रेष्ठा विनाशायातिदि-
तिच्च सं॥ एषप्रज्ञामानि सर्वेषां मृत्युध्वंगदत्तो मम॥ द्विपंचाशच्च घटिका दशमी दृश्यते यदा॥
छायेत्युच्यते ज्ञेया नंदावृद्धिर्यदा भवेत्॥ त्रिपंचाशद्दशी पूर्णा यस्त्वारव्यासे वगीयते॥ चतुः-
पंचाशद्घटिका संपूर्णावेधउच्यते॥ पंचाधिकेतिवेधस्यान्महद्वेधः षडाग्निके॥ प्रलयः सप्त-
पंचाशन्महान्नष्टाधिके भवेत्॥ नवाधिके महाघोरा संपूर्णो राक्षसी स्मृता॥ एवमादिश्च

स्मृ.

उपोष्यं तु देवे... रेभिः संयुता॥ आमृत्युकालपर्यंतमुपोष्या नक्तदाच नेति॥ तेच्छायादिभि र्न
वर्भिर्भेदैर्विद्धा याल्पकादशी सा वैष्णवेनोपोष्या॥ तत्र वे॥ धे पि विद्धे द्वादश्यैकादशी संजेत्॥
यदा तु द्विपंचाशद्घटिकादशमी तदा तु वैष्णवैर्द्वादश्यामुपवासः कार्यः॥ त्रयोदश्यां पा
रणं कार्यमिति॥ हेमाद्रिस्तु केषांचिदर्धरात्रेपि दशमीवेधमाह॥ अर्धरात्रे तु केषांचिद्दशम्या वेध मा
इष्यते॥ कपालवेध इत्याहुराचार्या ये हरिप्रियाः॥ इति ब्रह्मवैवर्तोक्तेः॥ केतु दीक्षा येनारु
णोदयवेधस्त्वेव परस्तु निरस्त इति तु माधवः॥ यस्तु विद्धं च दशम्या स्त्यक्तमेति वेधः स उपवा इति रि
क्त विषय इति माधवः॥ सर्वप्रकारे वेधोयमुपवासस्य दूषकः॥ सार्द्धसप्तमुहूर्तस्तु योगो
य बाधने ब्रूतमिति॥ निगमादिवचनं॥ तच्च माधवमते वैष्णवे रक्तलो रयविद्वासां ज्या॥ स
दा ते कादश्ये वस्युद्धा सती इते र्द्वादश्यां वो भयतात्दा परोपोष्या॥ एकादशी द्वादशी वा
धिका चेच्चाप्यलादिनं॥ पूर्वयाह्यस्तु चरंस्याद्दिति वैष्णव निर्णय इति माधवोक्तेः॥ स्मार्तैस्तु
सूर्योदयविद्धा हाप्या॥ यदा ते कादशी शुद्धा सती वर्द्धते द्वादशी च सामान्यनावालदायह
स्थैः पूर्वा यतिभिस्तूत्तरा कार्या॥ प्रथमेहनि संपूर्णा व्याप्याहोरात्रसंस्थिता॥ द्वादश्यांच
तथा तात दृश्यते तेव परेव सा॥ पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो इति स्कांदोक्तेः॥
बि वर्द्धमानाप्येवमाह॥ उभयत्र शुद्धा तु मुद्धा विशुद्धावासर्वैषां परेव॥ संपूर्णैकादशी यत्र प्रभाते

मा

ष्णुनरेवसा॥ सर्वैरेवोनराकार्यापरतोद्वादशीयदा॥ तिनारदोक्तेः॥ द्वादशीमात्रवृद्धौ च याशुक्ला
याः स्मार्तैरेव॥ नचेदेकादशीविद्धोद्वादशीपरतस्थिता॥ उपोष्यैकादशीतत्रयदिच्छेत्परमंपदमि
तिनारदोक्तेः॥ द्वादशीमात्रवृद्धौ तु शुद्धाविद्धेव्यवस्थिते॥ शुद्धास्मार्तैर्नरैर्विद्धास्मार्तैर्निर्णय
स्मृतिदर्पणेतिमाधवोक्तेश्च॥ मदनरत्नेप्येवम्॥ यत्तु॥ वि[illegible]द्धाप्यवि[illegible]द्धाविशेषापरतोद्वादशी
नचेत्॥ अविद्धापिचविद्धास्यापरतोद्वादशीयदेति॥ हेमाद्रौपाद्मवचनंतदेकादश्याः वृद्धौशे
यं॥ तदुक्तंमाधवेन॥ एकादशीद्वादशीचेत्युभयंवर्द्धतेयदा॥ तदापूर्वदिनंस्मार्तैर्यायाह्यंपर
दिनमिति॥ विद्धैकादश्यांद्वादशीमात्रवृद्धौचसर्वेषांपरैव॥ तत्रएकादशीमात्रवृद्धौगृहीणः
पूर्वायतेरुत्तरा॥ पूर्वोक्तपाद्मोक्तेः॥ एकादशीविवृद्धाचेच्छुक्लेकृष्णेविशेषतः॥ उत्तरांतुयतिः
कुर्यात्पूर्वामुपवसेद्गृहीति॥ प्रचेतसोक्तेः॥ एतद्वृद्धौविद्धानुल्यमितिमाधवः॥ त्रयोदश्यांन
लभ्येतद्वादशीयदिकिंचनउपोष्यैकादशीतत्रदशमीमिश्रितापिचेतिस्कांदात्॥ अविद्धानिनि
षेधस्यनलभ्यंतेदिनानितु॥ मुहूर्तैःपंचभिर्विद्धानग्राह्यैवैद्वादशीतिथिरितिऋष्यशृंगोक्तेश्च॥
मुहूर्तंपंचकमरुणोदयमारभ्यज्ञेयं॥ अन्यथोत्तरेणहिएकादश्याभावासंभवात्॥ यद्यपिहेमा
द्रिणाशुद्धसमासुदन्यूनावा॥ अधीवद्वादशीचेत्सर्वेषांपरैवसत्वं॥ तदपिवैष्णवविषयं॥ ॥
नचैकादशीपिवैष्णवानितिनारदोक्तेः॥ ॥ यत्तु॥ ॥ अविद्धापिचविद्धास्यादिति

पारणं शुद्धाधिकापरमं ॥ यत्तु संपूर्णा एकादशी सरलो यत्तु संपूर्णा एकादशी यावत्सरलो द्वादशी यदि ॥
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणं ॥ मिति निर्णयपरं ॥ स्मार्तानां तु शैवे वैष्णवविरोधः ॥ हेमा
द्रिमतेनोच्यते ॥ तत्र शुद्धा विद्धा द्वितीया नंदाश्चैव यान्यूनसमाधिके ॥ षड्प्रकारास्तु न तत्रैव द्वाद
श्यूनसमाधिके ॥ ॥ इत्यष्टधा द्वादश्येकादशीभेदः ॥ ॥ नंदा एकादशी एकादशी द्वादशी
चइनासमाधिक्रमे दैवेद्विधा ॥ न्यूना एकोनषष्टी घटिका समा षष्टिप्रमाणा ॥ अधिका षष्ट्यधिका ॥
॥ ॥ यथा ॥ शुद्धन्यूनान्यूनद्वादशीका ॥ एकादशी ५८ द्वादशी ६ प्रथमा द्यो भेदः ॥ शुद्धन्यू
नासमद्वादशीका ए ५९ द्वा ५९ द्वितीयः २ शुद्धन्यूनाधिकद्वादशीका ए ५९ द्वा ६० तृतीयः ३ शुद्धसमा
न्यूनद्वादशिका ए ६० द्वा ५९ चतुर्थः ४ शुद्धसमोसमद्वादका ए ६० द्वा ६० पंचमः शुद्धसमाधिकद्वा
दकोशी ६० द्वा ६१ षष्ठ ६ शुद्धाधिकान्यूनद्वादशीका ए ६१ द्वा ५९ सप्तमः ७ शुद्धाधिकासमद्वाद
शीका ए ६१ द्वा ६० अष्टमः ८ शुद्धाधिकाधिकद्वादशीका ए ६१ द्वा द ६२ नवम ९ विद्धन्यूनान्यूनद्वाद
शिका द ३ एकादसी ५८ द्वादशी ५८ दशमः १० विद्धन्यूनासमद्वादशिका द ३ एका ५७ द्वा ५६ एकादशः ११
विद्धन्यूनाधिकद्वादशीका द १ ए ५६ द्वा द १ द्वादशः १२ विद्धसमान्यूनद्वादशीका द १ ए ५९ द्वा द ५९ त्र
योदश १३ विद्धसमान्यूनद्वादशिका द १ ए ५९ द्वादशी ६० चतुर्दशः १४ विद्धसमाधिकद्वादशीका द ३
ए ५७ द्वा ६१ पंचदशः १५ विद्धाधिकान्यूनद्वादशीका द ३ ए ५८ द्वा ५९ षोडशः १६ विद्धाधिका

न्यूनद्वादशीकादं ३ए ५८ द्वा ५८ षोडशः १६ विद्धाधिकासमद्वादशीकाद ३ए ५८ द्वा ६१ समाप्तः ॥ १७ ॥
विद्धाधिकाधिकद्वादशीकाद १ येका २ द्वा २ अष्टादशभेदः ॥ १८ ॥ एवमष्टादशैकादशीभेदा भवंति ॥
॥ १८ ॥ तत्र शुद्धाधिकान्यूनद्वादशिका ७ शुद्धाधिकासमद्वादशीका ८ यस्सकामैः पूर्वा निकामैः
रुत्तराकार्या ॥ प्रथमे तु अन्ने संपूर्णेति पूर्वा स्कंदात् ॥ अत्र गृहयतिशब्दो सकामो निःकामे
परे ॥ ॥ तथा मार्कंडेयः ॥ संपूर्णैकादशी यत्र प्रभातपुनरेव सा ॥ पूर्वामुपवसेत्कार्या मीनीः
कामस्तूत्तरोपवसेत् ॥ ॥ उपवसेद्दिसर्वः ॥ पुनर्द्वादशीकायांतु विष्णुप्रीतिकामे रूपपासद्वयेक
र्यम् ॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ॥ लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत् ॥ उपो
ष्ये द्वे तिथी तत्र विष्णुप्रीणतत्परैरिति विष्णुधर्मोक्ते ॥ शुद्धान्यूनाशुद्धाधिकाशुद्धसमा विद्धन्यूना
विद्धसमाविद्धन्यूनाविसमावाधिकद्वादशीकाचेत्सर्वैपापरेवेतिहेमाद्रिः ॥ मदरत्नेतु ॥ शुद्धाधिको
परासंपूर्णैकादशी यत्रेति पूर्वोक्ते ॥ अन्याः पूर्वा ॥ शुद्धा यदासमाहीनां समाहीनाधिकोत्तरा ॥
एकादशीमुपवसेन शुक्लां वैष्णवीमपीति स्कांदात् ॥ शुद्धा एकादशी ॥ उत्तरा द्वादशी ॥ वि
द्धन्यूना समद्वादशीकातु मुमुक्षूणां परत्र वनानां परा अन्येषां पूर्वा ॥ पूर्ववतोपि पूर्वेति मदन र
त्ने ॥ विद्धन्यूनान्यूनद्वादशीकाच सेवसपैः कार्येति हेमाद्रिः ॥ मुमुक्षूणां परान्येषां पूर्वेति म
दनरत्ने ॥ विद्धसमासमद्वादशीकोनद्वादशीकाच मुमुक्षुभिः परान्यैः पूर्वा कार्या ॥ दशमी

मिश्रिता सर्वा द्वादशी यदि लभ्यते॥ शुद्धे एकादशी भूपा जन्तुर्योष्या मोक्षकांक्षिभिः॥ रि
ति व्यासोक्तेः॥ मोक्षकांक्षिभिरिति ग्रहणादन्येषां पूर्वैव॥ सर्वैरेकादशी कार्या द्वादशी मिश्रि
ता नरैः॥ प्रातर्भवतु मा वा स्यान्नित्यमुपोषणमिति मात्स्योक्तेः॥ विद्धाधिकासमद्वादशीका
चेत्सर्वैः पूर्वैव पारणाहे न लभ्यते द्वादश्यां केवलायामपि चेत्॥ तदा नंदशमीविद्धाप्यु
पोष्यैकादशी तिथिरिति ऋष्यशृंगोक्तेः॥ माधवमते तु॥ अग्रहीणः सर्वोपलेरुत्तरा॥
विद्धाधिकन्तु नन्दादशी कामोक्षपापक्षयविष्णुप्रीतिकामैः परा कार्या॥ गृहस्थैस्तु न
के कार्यम्॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी॥ उपवासं न कुर्वीत पुत्रपौत्रसमन्वि
तः॥ इति कौर्म्ये दिनक्षये उपवासनिषेधात्॥ दशम्येकादशी विद्धा द्वादशी च क्षयं गता॥ क्षी
णा सा द्वादशी ज्ञेया न तत्र तु ग्रहणं स्मृतमिति वृद्धशातातपोक्तेश्च॥ गृहिणां पूर्वोपवासः॥
एकादश्यां शुद्धन्यूनत्वे शुद्धसमत्वे वा द्वादश्यां न्यूनसमत्वयोरेकादश्यामुपवासः॥ यानि तु
दशम्यानुगता हन्ति द्वादशी द्वादशीफलम्॥ धनं पि सधना वायुं पि त्रयोदश्यान्तु पारणम्
इति कौर्मादिभिर्दशमीवेधत्रयोदशीपारणयोर्निषेधकानि तानि विहितनिषिद्धपारणानि॥
अत्र मूलवचनानि तद्व्यवस्था चाकरे ज्ञेया॥ एषां च पक्षाणां माधवोक्तसारेण व्यवस्था
शैवा॥ वैष्णवस्मार्तव्यवस्था याता हेमाद्रिणा तूक्ता॥ व्यक्तं तु हेमाद्रौ॥ बहुवाक्याविरोधेन संदेहो जा
यते यदा॥ द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणमिति मार्कंडेयोक्तेः॥ संदिग्धेषु च वाक्येषु

द्वादशीं समुपोषयेत्॥ ॥तथा॥ ॥वाराहेपि च सर्वेषु द्वादश्यां समुपोषणं॥ पारणं
त्रयोदश्यां मासेषु मासमृक्षानुनेतिपापोक्तेश्च॥ वेधसंदेहप्येतितिथिविदांप्रविलिप्तोरापरा
कार्यैरुक्तं॥ तदेवं विषयमितिफलं बहुना॥ ॥अथात्रियेरुक्तो किंचिदुच्यते॥
॥ ॥तत्र दशम्यामेकादश्या योगे दशमीमध्य एव भोजनं कार्यम्॥ एकादश्यां न भुंजी
तेति तस्या एव निषिद्धत्वात्॥ निषेधस्तु निष्टसात्माकाल्वमाग्रमपेक्षतइति देवलोक्तेश्च॥
केचित्तु एकादशीव्रतांगत्वेन पूर्वेद्युरेकभक्तविधानाद्विधिस्पृष्टे निषेधानवकाशा
न्नकाम्यव्रतांगभोजनं पूर्वेद्युरेकभक्तविधिनाद्विधिस्पृष्टे निषेधः प्रवर्तते॥ तेनैकादशी
मध्येपि पूर्वदिने पि भोजनमित्याहुः॥ अधिकारि माधवीयेकात्यायनोक्तः॥ अष्टवर्षाधि
को मर्त्यो ह्यशीतिन्यूनवत्सरः॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपीति भविष्ये॥ ब्रह्म
चारी च नारी च शुक्लामेव सदा यतीति॥ यत्तु विष्णुः॥ पत्यौ जीवति या नारी उपोष्य व्रत
माचरेत्॥ आयुष्यं हरते भर्तुर्नरकं चैव गच्छतीति तदनुज्ञा विषयमिति प्रसक्तो॥ उपवासा
समर्थ्ये तु माधवीये कौर्मे यो॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन दानेन
न निरुद्वादशिका भवेत्॥ अत्र॥ एकभक्तेन यामर्त्य उपवासं व्रतं चरेदित्येकभक्तादिरुपवा
सशब्दस्तद्धर्मातिदेशार्थः॥ तेन तत्सद्धर्माः सर्वे धर्मा सेवनस्यमेवैचैकभक्तादिपदेनोहः
कार्य इति मदनरत्ने॥ ॥तथा॥ ॥सामर्थ्ये सति निधिना कार्यमितिप्रायश्चित्तं॥ ब्रह्माण्डे

रणेशायाश्चित्तं माधवीये कात्यायनः॥ अर्कैः पर्वद्वये रात्रौ चतुर्दश्यष्टमे दिवा॥ एकादश्यामहो
रात्रं भुक्त्वा चांद्रायणं चरेदिति॥ ॥ छ ॥ अथ काम्यव्रतविधिः॥ ॥ तत्र नारदीये॥
दशम्यादिमहापाल त्रिदिनपरिवर्जयेत्॥ गंधतांबूलपुष्पादि स्त्रीसंभोगमालाधरादिति॥ त
त्र दशम्याविधिः कौर्म्ये॥ कांस्यं मांसं मसुरांश्च वपनं बीजमैथुनं॥ द्यूतं सत्तुपानं च दशम्यां वै
अवत्यजेत्॥ ॥ मदनरत्ने नारदीये॥ ॥ अक्षारालवणाः सर्वे हविष्यान्ननिषे
त्रिपाः विणः॥ अवनीतल्पशयनाः संगमिवर्जितः॥ त्र्याम्बाह हेमाद्रौ देवलः॥ ॥ असकृज्ज
लपानाच्च सकृत्तांबूलचर्वणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥ ॥ अशक्तौ
तु मदनरत्ने देवलः॥ असकृच्चाम्बुपानेन नोपवासः प्रणश्यति॥ ॥ असयेकदे॥ विष्णुरहस्ये॥
गात्राभ्यंगो शिरोभ्यंगो तांबूलं चानुलेपनं॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यत्र निराकृतं॥ ॥
एषु प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे॥ स्तेनहिंसकयोः सख्यं कृत्वा स्त्रैन्ये च हिंसने॥ प्राय
श्चित्तं व्रती कुर्याज्जपेन्नामशतत्रयम्॥ मिथ्यावादे दिवास्वापे बहुशोंबुनिषेवने॥ अष्टाक्षरं प
ठेज्जप्त्वा शतमष्टोत्तरं शुचिः॥ ॐ नमो नारायणायेत्यष्टाक्षर॥ तत्रैव पैठीनसिः॥ तांबूलप
र्वले स्त्रीसंभोगे मांसंग्निषेवने॥ व्रतलोपाच्चनेत्कुर्यात्प्राणायामं जिवर्जनमिति॥ संभोगस्तु कौला
दन्यत्र॥ एतत्संकाशसंभोगनिलेन्यत्र क्षयस्मय स्मृतरत्नितत्रैकोसायनोक्तेः॥ हेमाद्रौ वसिष्ठः॥
उपवासे तथा श्राद्धे नकुर्यादंतधावनं॥ दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं॥ काष्ठयत्न

न्नलोपाद्यनिषेधेऽरत्ति हेमाद्रिः ॥ विष्णुरहस्ये ॥ श्राद्धं कृत्वा परे दिवसे रवादिताद्दंतधावनं ॥
गायत्र्याशतसंपूतमंबु प्राश्य विशुध्यति ॥ निर्णयामृते व्यासः ॥ वर्जयेत्सारलं मांसं व्रताहे प्र-
षिद्धं स देति ॥ ॥ एकादश्यां श्राद्धप्राप्तौ माधवीये कात्यायनः ॥ ॥ उपवासो यदा नि-
त्यश्राद्धं नैमित्तिकं भवेत् ॥ उपवासं तदा कुर्यादाघ्राय पितृसेवितमिति ॥ मालायामप्युक्तं पक्षे प्रा-
प्ते भवेदेकादशी यदि ॥ अन्यच्च पितृदेवांश्च आजिघ्रेत् पितृसेवितमिति ॥ हेमाद्र्यादिसर्वनि-
बंधेष्वेवम् ॥ एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्यमिति वदंतः परास्ताः ॥ किंच ॥ माहाल-
ये ॥ सपक्षः सकलः पूज्यः श्राद्धं षोडशकं प्रतितात्रातं षोडशकं मम् ॥ पौषैकादश्यां च मन्वादि-
श्राद्धस्य प्राप्तौ परिज्ञाने च तस्यैकादश्यां विहितं श्राद्धं बाधितमेव स्यात् ॥ यद्यपि स्मृतिचंद्रि-
कायां पठंति ॥ अन्नमाश्रितानि पापानि तद्दोत्तु दातुरेव च ॥ मज्जंति पितरः तस्य नरके कुश-
रवनास्समाः इति ॥ तस्यापि रागप्राप्तभुंजानगोचरस्यैवेदं श्राद्धगोचरयतामहत्साक्तसमित-
लं ॥ योपि जलं तु श्राद्धतिथ्यया जलधिजविलानुलाइति लघुनारदीये एकादश्यां श्राद्धतर्प-
णादि निषेधः स मातापित्रोभिन्नविषयः पूर्ववाक्येन तद्ग्रहणात् ॥ निर्णयः शंतियत्ताः ॥ ॥
अव्रतघ्नान्याह मदनरत्ने देवलः ॥ सर्वभूतापर्यंव्याधिः प्रसादो गुरुशासनं ॥ अव्रतघ्नानि पंच-
वे सर्वदैतानि शास्त्रतः ॥ स्कांदेपि ॥ अष्टैतान्यव्रतघ्नानि आपो मूलं फलं पयः ॥ हविर्ब्राह्मण-
काम्या च गुरोर्वचनमौषधम् ॥ इदं चातिसंकष्टविषयं ॥ ॥ लघुनारदीये ॥ अनुगतो

त्पणांशेषः क्षाराणां च लवणानि मूलं फलं स्तोपत्रुपभोग्यं भवेच्छुभे ॥ नैवेद्यभोजनं वैष्णवे द्वादश्यां
शस्तमिति ॥ अस्यापवादः ॥ शयने च समुत्थाने मत्स्यार्द्धपरिवर्तने ॥ नरो मूलफलाहारी हृ
शल्यं ममार्पयेत् ॥ एते चाविरोधिनो निर्णयाः सर्वव्रतेषु ज्ञेयाः ॥ तत्रैकादश्यां संकल्पः ॥ एकादशाहो
हं वरं पाशपाणि शरणं सुदर्शनः ॥ उपवासं तु गृह्णीयाद्यद्वा दावार्यो वे धारयेदिति माधवपरावा
राहोक्तेः ॥ मंत्रस्तु विष्णूक्तः ॥ एकादश्यां निराहारः स्थित्वाहमपरेऽहनि ॥ भोक्ष्यामि पुंडरीका
क्ष शरणं मे भवाच्युतेति ॥ शैवादीनां तु ते मांडूक्यो सौरपुराणे ॥ सावित्र्यास्रथवा नाम्ना से फलं
तु समाचरेत् ॥ शिवादिगायत्र्यो यजुर्वेदप्रसिद्धः ॥ वाराहे ॥ रक्षाचार्यं ततो विद्वान् पुष्पांजलि
मथार्पयेत् ॥ ततस्तं जलं पिबेत् ॥ अष्टाक्षरेण मंत्रेण निर्जले नाभिमंत्रितं ॥ उपवासफलं
प्राप्नुः पिबेत्साग्रगतं जलमिति ॥ कात्यायनोक्तेः ॥ मध्यरात्रे उदये पादशम्या वेधैरात्रो संकल्प
इति माधवः ॥ दशम्यां संगदोषेण अर्द्धरात्रात्परे ततः ॥ वर्जयेच्च चतुर्यामान् संकल्पार्थं न चेत्त
दा ॥ विद्धोपवासेन अस्त्वेदिनस्त्काससमाप्तितः ॥ कुर्यात् जागरं नियतो व्रति द्वादश्यां निवेदनतु
क्तः ॥ कात्यायनेन ॥ अज्ञानतिमिरांधस्य व्रतेनानेन केशव ॥ प्रसादसुमुखो नाथ ज्ञानदृष्टि
प्रदो भवेति ॥ नारदीये ब्राह्मणान्भोजयेच्छक्त्या दद्याद्दक्षिणां ततः ॥ स्कांदे ॥ ततो नैवेद्यपरा
सं तु योऽश्नाति द्वादशीदिने ॥ नैवेद्यं तु कृत्वा सामिष्टं त्वसाः कोटिशाने ॥ ॥ द्वादश्यां च वर्ज्यान्या
तस्त्माह च प्रजापतिः ॥ दिवानिद्रां परान्नं च पुनर्भोजनमैथुने ॥ क्षौद्रं कांस्यामिषं तैलं द्वा

दशम्यामेव वर्जयेत्॥ परान्नस्य क्वचिदपवादस्मर्यते॥ श्वशुरान्नं गुरोरन्नं मातुलान्नं नृपान्नं तथै
व च॥ पितृव्यभ्रातृपुत्राणां परान्नं नैव दोषकृत्॥ दिति॥ हेमाद्रौ ब्रह्माण्डपुराणे॥ पुनर्भोजन
मध्वायासो स्त्रियायसमैथुने॥ उपवासफलं हन्तुं दिवानिद्रा च पंचमी॥ स्कांदे॥ ॥ परान्न
कांस्यतांबूलं लोभं वितथभाषणं॥ वर्जयेदिति शेषः॥ विष्णुधर्मे॥ असंभाष्यान् हि संभाष्य तु
लस्य तुलसीकादलं॥ आमलक्या फलं वापि पारणे प्राश्य शुध्यति॥ बृहन्नारदीये॥ रजस्व
ला च चांडालं महापातकिनं तथा॥ सूतिकां पतितं चैव उच्छिष्टं रजकादिकं॥ व्रतादिमध्ये स्पृ
ष्ट्वा पादमेषां त्वनिष्ठितमः॥ अष्टोत्तरसहस्रं तु जपेद्वेदमातरं॥ ॥ एतद्व्रतं सूतके
पि कार्यम्॥ ॥ सूतके मृतके वापि न त्याज्या द्वादशी शुभे तिथिले॥ विष्णुने॥ ॥ तत्र पक्वं दानादि
सूतकांते कार्यम्॥ सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं॥ दानं दत्वा विधानेन व्रतस्य फल
मश्नुत इति मात्स्योक्तेः॥ स्त्रिया रजोदर्शनेपि कार्यम्॥ ॥ एकादश्यां न भुंजीत नारी दृष्टे
रजस्यपि पुष्पवत्युक्तेः॥ यदा द्वादश्यां श्रवणर्क्षं न स्यात्तदा मध्ये एकादशी चेत् तत्रैवोपवासः
कार्यः॥ शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता॥ तयोरेवोपवासः स्यात् त्रयोदश्यां तु पा
रणमिति नारदीयोक्तेः॥ एते च नियमाः काम्यकर्तृव्रते नियताः॥ नित्यव्रते सति संभवे
काम्याः॥ शक्तिमान्तु पुनः कुर्यान्नियमं सविशेषणमिति कात्यायनोक्तेः॥ अत्र कौस्तुभः
कार्यं ब्रतमेवैकम्॥ ॥ इति विज्ञाय कुर्वीत वरयमेकादशीव्रतम्॥ विशेषनियमाज्ञाता
फोहोरात्रं सुजा वर्जित इति॥ ॥ अथाष्टौ महाद्वादश्यो निरूप्यंते॥ ॥ तत्र सुद्धा २६

धिकैकादशीयुक्ता द्वादशी उन्मीलिनी स्मृता ॥ द्वादश्येव तु वृद्धाधिक वर्धते चेत्सा वंजुली ॥ वारत्र
यस्यस्पर्शि नात्रिस्पृशा ॥ अग्रे पर्व संपूर्णाधिका हि पक्षवर्धिनी ॥ पुष्यर्क्षयुता जया ॥ श्रवणयु
क्ता विजया ॥ पुनर्वसुयुता जयंती ॥ रोहिणीयुता पापनाशिनी ॥ एताः पापक्षयमुक्तिकाम उ
पवसेत् ॥ अत्र मूलं हेमाद्रौ ज्ञेयम् ॥ एकादशीद्वादश्योरकहेलं त्रैणोपवासः ॥ पार्थक्येनाश
क्तोपवासद्वयं ॥ एकादशीमुपोष्यैव द्वादशीमुपोषयेदिति विष्णुरहस्यात् ॥ अशक्तौ तु द्वा
दश्यामेव ॥ एवमेकादशी सहद्वादशी मुपोषयेत् ॥ पूर्ववासरजं पुण्यं सर्वमाप्नोति सं
शयमिति तत्रैवोक्तेः ॥ यदा न लभ्या द्वादशी तदोक्तं मात्स्ये ॥ यदा भवति अल्पापि द्वादशी पार
णे दिने ॥ उषःकाले द्वयं कुर्यात्प्रातर्मध्याह्निकं तदा ॥ नारदीयेपि ॥ अल्पायामथ विप्रेन्द्र द्वाद
शीमरुणोदये ॥ स्नानार्चनक्रियाः कार्या दानहोमादिसंयुता इति ॥ संकटे तु माधवीयेद्वलः
संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं ॥ अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदिति ॥ संक
टत्रयोदशी श्राद्धमद्योपादे ॥ अत्र केचिदाहुः ॥ अप एव्यं वान्यनाहि[illegible]तिलाग्निविषयाणि ॥
अग्निहोत्राहानौ श्रौतहेतुनापकर्षयोगादि ॥ द्वादश्यां च प्रथमपादमिति मत्स्यभुवस्त्र न सरस्वति
निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः ॥ अत्र केचित्संगिरंते ॥ यदाल्पा यस्मात् द्वादशी तदापि
प्रातर्मुहूर्तत्रये पारणं कार्यं ॥ सर्वेषामुपवासानां प्रातरेव हि पारणमिति वचनादिति ॥ अ
स्मत्तु रवेस्तु बहूनां कर्मकालानां विनाकारणं मानहीं जालीनां मशने श्रुतिचोदितमिति तु
दपराह्णे वा चित्ते सुपपं भुः ॥ न चकावैयर्थ्यं ॥ पुनर्भैजनस्यैव पारणमिति स्पष्टार्थत्वाग्नस्य

स्याहुः॥ प्रमादेन एकादश्यां उपवासानिमेषपरार्द्धेवरात॥ एकादशी विद्धा त्याज्या द्वादशी
परतः स्थिता॥ उपोष्या द्वादशी तत्र यदीच्छेत् परमं पदमिति॥ केचित्तु विद्धानां चेत्तिपरितः॥
अत्राविरोधिनो नियमाः सर्वत्रैव वेद्दिष्यः। अन्ये च नवरात्रमेव वक्ष्ये तत्र इति दिक्॥ ॥इ
तिश्री रामकृष्ण भट्टात्मज कमलाकर भट्ट कृते निर्णयसिंधौ एकादशीनिर्णयः॥ ॥द्वादश्या
उपवेश ॥ युग्मवाक्यात्॥ द्वादशी तु प्रकर्तव्या एकादश्या युता प्रभो॥ इति स्कान्दात्॥ त्रयोदशी
सर्वमते शुक्ला पूर्वा कृष्णोत्तरा॥ त्रयोदशी तिथिः पूर्वा सितेऽत्र सिते परा इति दीपिकोक्तेः॥
शुक्ला त्रयोदशी पूर्वा परा कृष्णा त्रयोदशी माधवात्॥ चतुर्दशी तु सर्वमते कृष्णा पूर्वा शुक्लो
त्तरा॥ उपवासोद्ये पिपरेति मदनरत्ने॥ भूतो ष्टम्या प्रकर्तव्या उपवास व्रतादिषु॥ परे वस
र्वथा देवा अन्यथा पापमाप्नुयात्॥ व्यासस्मरणात्॥ पौर्णमास्याऽमावास्ये तु सावित्री व्र
तं विना पूर्वे ग्राह्या॥ भूतविद्धेन कर्तव्ये दर्शपूर्णे कदाचन॥ वर्जयित्वा नरश्रेष्ठ सावित्री व्रतमु
त्तममिति ब्रह्मवैवर्तात्॥ अमायां योगविशेषो परार्के श्राद्धानालपः॥ अमायां विभवे द्वारा
यदा न स्मृति सुतस्यैव॥ जान्हव्यां स्नानमात्रेण गोसहस्र फलं लभेत्॥ अमावास्यां सोमवारे
रविवारे ण सप्तमी॥ चतुर्थी भौमवारे ण विषुवत्सदृशं फलं॥ ॥तत्रैव व्यासः॥ ॥
सिनीवालि कुहू वाऽस्य यदि सोमप्रवेदिनेत्॥ गोसहस्र फलं दद्यात् स्नाने वै मौनिना कृते॥ ॥
हेमाद्रौ व्यवस्मृतेः॥ श्रवणाश्विधनिष्ठार्द्रा नागदैवतमस्तके॥ यद्यमा रविवारेण व्यतिपातः
स उच्यते॥ नागदैवतमाश्लेषा मस्तको मृगशीर्षं॥ प्रथमपाद इत्यन्ये॥ सप्तसवेद॥ ॥

अथेष्टिकालः॥ गोभिलः॥ पक्षान्ता उपवस्तव्याः पक्षादयोभियष्टव्या इति॥ उपवसोन्वा
धानम्॥ तत्र मध्यान्हेन सर्वं वा पर्वप्रतिपत्संधौ तद्दिने यागः॥ पूर्वाह्णे वायमध्यान्हे यदि प
र्व समाप्यते॥ उपोष्य तत्र पूर्वेद्युस्तदहर्योग इष्यत इति॥ लौगाक्षीवचनात्॥ अत्र य
च्च द्वेधा विभागः॥ आवर्तनात्तु पूर्वाह्णे ह्यपराह्णे स्ततः परः॥ मध्यान्हस्तु द्वयोः संधिय
दावर्तनन्तु तत्र संस्कृति मदनरत्नवचनात्॥ मध्यान्हादूर्ध्वं संधौ माधवमते तु परेद्युर्यागः॥
अपराह्णे यवारा आग्नेयादि पर्व समाप्यते॥ उष्य तस्मिन्नहनि श्वोभूते योग इष्यते इति तेनै
वोक्तेः॥ हेमाद्रिस्तु पराह्णे संधावपि परदिने प्रतिपच्चतुर्थांशे चंद्रोदयसद्भावे द्वितीयदिने य
तक्षयेसतां पूर्वेद्युर्यागः॥ पर्वणांशाद्द्वितीये तु व्यष्टव्यं तु द्विजातिभिः॥ द्वितीयास्तु हितं प
स्मात् पर्वसार्वलायनं इति॥ द्वितीयेति तिथ्यो त्ति न्यायेन न तु यागापरम्॥ तुरायेद्द
ष्टिरमावास्याभूतेरव्यादिकांक्षिये तिबौधायनवचनाच्चित्युचिवान्॥ मदनरत्नेपि॥ चत
चतुर्दशी चतुर्थीमा अमावास्या न दृश्यते॥ सोमस्तत्रैतिप चैत्यात् सर्वो तत्रैव कारयेदि
ति॥ यत्तु माधवः॥ यस्तु वाजसनेयास्यात्तस्य संधिदिनात् परा॥ न काप्यन्वाहितिः किंतु
सदा संधिदिने हि सेष्ठाह्॥ यत्तु कालादर्शे युक्तम्॥ आवर्तनादधः संधिय द्यन्वाधायत
द्दिने॥ परेद्युरिष्टिरित्याहुर्विना वाजसनेयिनः इति॥ यच्च मदनरत्ने॥ मध्यंदिनास्यादहनी

स

यस्मिन्प्राक्पर्वणेः संधिरिष्टंत्स्तनीयासारद्विकां वाजसनेरनः स्यात्तस्यास्तु पोष्यायपरेद्यु
रिष्टिरिति एतत्पोर्णमासा परामिति तत्रैव ॥ आवर्तनोर्ध्वंम ध्यागस्ताद्धा त्रैवासमाप्तेर्द्धम
ध्यान्हाद र्वाक् समाप्तीस्तनीयेर्थः ॥ तत्रु के भाष्ये देव जानी श्री अनंतभाष्यादि सकळ
तच्छाक्ति यये अविरोधाद्धद्धानारदा ज्ञा पेक्ष्यं विशेषमाह कात्यायनः ॥ ॥ संधिमध्ये से
गवाद्धर्ध्वं प्राक्पर्यावर्तनाद्रवेः ॥ सा पौर्णमासा विज्ञेयासद्यः स्कालवी धौनरैः ॥ ॥ अ
मां यां विशेषमाह बोधायनः ॥ हितान्त्रियामुरतीयमतिपद्यापरा एहको ॥ अन्वाधानं चतुर्दश्यां
परतः सोम्यदर्शनात् ॥ कात्यायनस्य ॥ यजनीये न्हि सोमश्चेद्दारुण्यादिशि दृश्यते ॥ तत्र व्याहृ
तिभुर्तादं दध्यादि जायतइति ॥ एतच्च बोधायनं वाजसनेयीविषयम् ॥ ॥ तैत्तिरीय
श्रुतौ चंद्रदर्शनेपि याग उक्तः ॥ एषावै सुमनानामेष्टिर्यमद्य जानन्यश्चाचंद्रमा जप्युदे
यास्मिन्नेवास्मै लोकानम्युदेतीति ॥ मदनरत्ने प्येवम् ॥ आपस्तंबभाष्यार्थसंग्रहेप्येवम् ॥
अतः पूर्वाह्न यस्य स्वस्त्रो ध्यवस्थेति तत्वं ॥ दूषयं साश्वलायनार इति तुरवी एहसंधिवि
षव्यमिति माधवः ॥ शेषपर्वणो विशेषमाहमाधवीये गार्ग्यः ॥ प्रतिपद्यप्रतिष्ठायां यदि चे
ष्टिः सैव समाप्यते ॥ पुनः प्रणीयतल्लेष्टिः कर्तव्यापगामितत्रमे ॥ ज्यग्निर्नाति नियमइति म
दनरत्ने ॥ एवं पर्वांशाः प्रतिपदस्त्रयोंशो यागकालधक्तः ॥ कश्चित्तु प्रतिपच्चतुर्थांशे
पियागः ॥ संधियदिपराण्हे स्याद्यागं प्रातः परेहनि ॥ कुर्वीत प्रतिपद्भागे चतुर्थे पितद

प्यागेति वृद्धशातातपोक्तेः॥ एतत्पूर्णिमापरमितिमदनरत्ने॥ पर्वणि प्रतिपत्क्षयेऽस्य वृद्ध्यर्थाद्वैप
क्षिप्य संधिर्ज्ञेयः॥ तद्धेतमाधवः॥ वृद्धिः प्रतिपदायां स्थितदर्द्धं पर्वणि क्षिपेत्॥ क्षयास्या
र्द्धं तदा क्षिप्त्वा संधिर्निर्णयः पलांसं देति॥ कात्यायनोपि॥ पर्वप्रभि घटिकान्यूनास्थालीपा
केपि ज्ञेयं॥ तत्रेष्टिः स्थालीपाकान्वाधानगृहप्रवेशनादिहोमा नेतरपार्वणान्यादेः पौर्णमा
स्यामारंभणीयोन्नदर्शे॥ यथारंभेमलमासे पौषमासः शुक्रादिमवगतिलदाप्यारंभः कार्यः॥
यान्निनुपरागोधिमासः अपदिप्रथमपर्वणि॥ तथा मलिम्लुचे पौषेनान्वारंभणमिष्यते॥
गुरुभार्गवयोर्मौढ्ये चंद्रसूर्यग्रहे तथेति संग्रहवचनान्निलाने अब्दस्यांदी नाति कालसुद्ध
कालप्रारंभविषयाणि॥ नामकर्मेचदर्शेष्टिं यथाकालं समाचरेत्॥ अतिपाते सति तु यैः
प्रशस्तेमासिपुण्यतेस्य पार्के गर्गवचनादिति प्रयोगपारिजाते॥ उक्तं चैव प्रयोगरत्ने स्मृत्यैः॥
कालादर्शे तु नानामकर्म चनादितिप्रयोगपारिजाते॥ उक्तं चैव प्रयोगरत्ने स्मृत्यैः॥ कालाद
र्शे तु नानाकर्म चजातेष्टिमितिपाठः॥ आधानानंतरं पौर्णमासी चेन्मलमासयागः॥ त
स्यामारंभणीयादिनकुर्यात् कदाचनेति त्रिकांडमंडनवचनात्तु शुद्धिकाल एवविकृष्टेष्टिं
रुप्रारंभकुर्यादित्याहुः॥ कालादर्शे स्मृतिसंग्रहेपि॥ आरंभं दर्शपौर्णमासयोराग्निहोत्रस्यचा
दिमां॥ प्रतिष्ठापंचकर्माद्याः मलमासे विवर्जयेत्॥ अथ विकृतिः॥ ॥ तेष्वायत्तेष्व॥
यदि स्यायाति पशुनाय यदि सोमनयजेत सोमावास्यायां पौर्णमास्यां चेति॥ माधवोपि॥
रप्यादिविकृतिः॥ सर्वापर्वण्येवेति निर्णयदृतिः॥ अत्रविशेषमाह त्रिकांडमंडनः॥ कोसा

यनञ्च॥ आवर्तनात्प्राग्यदि पर्वसंधिः स्यात्तुतस्मिन्प्रवृत्तिर्विरुद्धा॥ तैर्दैवयागः परतोयदि
स्याचस्मिन्विरुद्धाः प्रवृत्तेः परेद्युरिति॥ अर्तस्याभ्यादयोप्येवमाहुः॥ यदिष्येति सांगायाः
विरतेपर्वकालमावर्तनात्प्राक्तस्यौ संधिमग्नितोयजेतेतिप्रवृत्तेः॥ प्रतिपदि समाभि
नियमात्॥ प्रवृत्तेः पूर्वत्वाद पूर्वमंतेस्यादित्यापस्तंबेनोक्तं॥ तथापि हेतुवादेनश्रुतिमूल
ताभावादगंसमग्निः व्याहारादिति वदप्रमाण्यमिति तदाशयः॥ ॥ अथाग्न्य
ये तु विशेषं वक्ष्यामः॥ अन्वारंभणी यातु चतुर्दश्यां कार्ये हिरण्यकेशिशाखिनां॥ मात्स्य द
तीये॥ अन्येषांपर्वण्येव॥ यशोकालांतरमप्याह बौधायनः॥ अमावास्येन वाहविषेष्ट्वा
नक्षत्रेवेति॥ शुक्लपक्षे रात्तिकादि विशाखांतेषु देवनक्षत्रेष्विति केशवस्वामी यात्र रव्यो॥
चातुर्मास्येष्वपिद्वादशाहंयथाभयोः पक्षयोनिक्षत्रेष्वारंभः॥ याज्ञवल्क्यसांवत्सरप्र
योगयोस्तु फाल्गुन्यांचैत्र्यांवारंभः॥ पशौतु विशेषमाह कात्यायनः॥ अर्धादहोरात्रे
निसंपर्वसंधिःपुरस्तात्तता तस्मिन्नहनिलुप्तमधर्व॥ द्विहंता अधिकारपशुस्तेनीयोमी
येत्तेरवनीयेनचाप्रस्यनेन्नाश्रोवायश्तिप्रिकोपमंजनः॥ सोमेतायापस्तंबः॥ अमावा
स्यायांदीक्षायजनीये वामावास्यायां यजनीदेवासमाहः॥ पौर्णमास्यायांदीक्षायज
नीयेवा पौर्णमास्यापां यजनायवासुसमहरिति॥ बौधायनस्तु॥ पूर्वपक्षस्य प्रथमे
हनि दीक्षेत इष्टानक्षत्रयोगेचेति॥ सर्वपक्षप्रस्तु कूपक्षः॥ नक्षत्रयोगेरेवप्रथमकर्षः॥ चै
न आदिपौर्णमास्यांचित्राादिनक्षत्रयोगे दीक्षेतेति॥ आधानंतु पर्वणिन क्षत्रेषुचोक्तं॥ त

तत्र पर्वणि नक्षत्रगार्ग्यपक्षमादधीतेत्यादि ॥ कर्मकालव्यापि ग्राह्यम् ॥ दिनद्वये तत्परं ग्राह्यं ॥ संकल्पस्य पर्व
णि तु भानं ॥ पर्वनक्षत्रयोगे तदेव ग्राह्यं ॥ यत्र त्रीणि संनिपतन्ति तान्यृतुर्नक्षत्रं ॥ चेत्पर्व तत्र तत्र मुख्यं हि
विप्रकर्षे ऋतुर्नक्षत्रं च बलीय इति हिरण्यकेशी भाष्ये ॥ सतु वसंते ब्राह्मणोऽग्निमादधीतेत्यादि ॥ रेणुका
रिकायां तु धानं ॥ आनक्षत्राणि तापस्तंबाः स्त्रे ॥ कृत्तिकारोहिणीमृगशीर्षपुनर्वसुपुष्यपूर्वा
उत्तरा पूर्वाषाढोत्तराषाढा हस्तचित्राविशाखानुराधाश्रवणोत्तराभाद्रपदा इति ॥ सोमपूर्वाधा
ने विशेषमाहापस्तंबः ॥ सोमेन यक्ष्यमाणस्याधानो नर्तु पृच्छेत् न नक्षत्रमिति ॥ अत्र प्रकरणा
धानकालबाधः ॥ तेन सोमस्य वसंतकालता न बाध्यते इति ॥ रुद्रदेवस्तु नारायणवृत्तौ चोक्तं ॥
धूर्तस्वामी तु सोमस्य प्रियऋतुत्वादपि न सूर्यस्योदितिरवनादुभयकालबाधं मन्यते ॥ आरामाज
रस्तु कालांतरविधानं वा सर्वकालानादरो वेति पक्षद्वयमुक्त्वाने ॥ तत्राद्ये कृत्तिकादिकालांतरस्य
प्रधानेन संतावधा बाधेन विधानम् ॥ तथा ॥ सोमो ऽस्तु दगयन पूर्णपक्ष पुण्याह संनिपातेयज्ञ
कालेनादेशाइति छंदोगसूत्रप्रोक्तोदयनबाधेन सोमाग्निसंनिधिरूपकालांतरविधानादुदगयनं
लेपे क्षेतरस्तत्तं ॥ द्वितीयपक्षे तु यदैवेनं यज्ञ उपनमेदिति सर्वकालानादर उक्तः इति सरहा ज्यस्तु
ज्ञात्सर्वशब्दस्य च विश्वजित्सर्वदक्ष इति ॥ तद्वयोरप्रयोगात्सर्वकालाबाध इति तेन दक्षिणाय
नेऽपि प्रवसेवनेमउक्तम् ॥ षड्गुरुभाष्ये देवरातभाष्ये तत्र रत्ने च षड्पि स्त्रवउ प्रभवन्ति सत्क्त मि
तिदिक् ॥ ॥ अथ श्राद्धे वाग्निर्णयः ॥ ॥ श्राद्धममावास्या त्रिधा विभक्तदिनतृती

३

यांशो यो मा: पराण्हे त्स व्यापिनी सा निवैग्राह्य ॥ पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ॥
वासरस्य तृतीयांशे नातिसंध्यासमीपत इति कात्यायनोक्तेः ॥ दर्शश्राद्धं तु यत्प्रोक्तं पा
र्वणं तत्प्रकीर्तितं ॥ अपराण्हे पितृणां च तत्प्रदानं प्रशस्यत इति शातातपोक्तेश्च ॥ दिनद्व
ये अस्तसत्वे सर्वापराण्हव्यापिदर्शो ग्राह्यः ॥ यद्युभयेद्युरेव विहितसर्वापराण्हस्थित इ
ति दीपिकोक्तेः ॥ यत्तु कापर्दिकारिकाः ॥ भूतविद्धाममावास्यां मोहादज्ञानतोपि वा ॥ श्राद्धक
र्मणि यः कुर्यात्तस्यायुः क्षीयते ध्रुवमिति तदपराण्हे चतुर्दशीवेधपरमिति श्राद्धहेमाद्रिः ॥ अ
पराण्हव्यापिपरमिति माधवः ॥ दिनद्वये पराण्हे व्याप्त्यव्याप्तौ वैषम्येण व्याप्तौ चेत् तिथिक्षये
पूर्वेति हेमाद्रिः ॥ चतुर्दशीयामं तुरीयमनुपूरयेत् ॥ अमावास्या क्षीयमाणा तदैव श्राद्ध
मिष्यते इतरेति कात्यायनोक्तेः ॥ चतुर्दश्यां स्वतुर्ययामं दर्शः पूरयेत् ॥ चतुर्दशीयामं चे
यस्याश्चित्यर्थः ॥ क्षीयमाणापरदिने पराण्हव्यापिनी नेत्यर्थः ॥ व्यतिरेकमाह ॥ वर्द्धमा
नाममावास्यां लक्षयेदपरेहनि ॥ यामांस्त्रीनधिकान्वापि पितृयज्ञस्ततो भवेत् ॥ न
तः श्राद्धं च ॥ [illegible]दिनद्वये पराण्हव्याप्तादैतिथिर्दर्शे च हारीतः ॥ त्रिमुहूर्ताप्यमावा तु सर्वो
ते इत्यर्थः ॥ पिंडपितृयज्ञे तु आश्वलायने योगदिनात्पूर्वेद्युः कार्यः ॥ पूर्वो वागताहिन्यत्र इ
ति तत्सूत्रात् ॥ व्याख्यातं चैतत्पूर्वाचार्यैः ॥ पूर्व एव दर्शः शास्त्रे उपितृयज्ञो न पश्चात् ॥ श्रुतेः ॥
अंगत्वात् ॥ तथा च श्रुतिः ॥ तस्मात्पूर्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान्यजंत इति पूर्वेद्युः

३०

निर्णय

पितृभ्यो यज्ञं निरूपणीयमासार्द्धदेवेभ्यः प्रततनदिति च ॥ तेनन्ममेगमेवासौ ॥ तदुक्तं ॥ आगंबा
समभिव्याहारादिति ॥ तेनकर्ममतेचतुर्दश्यायुक्तदर्शेपित्र्ययज्ञ इति ॥ श्रीमंदनेन भाष्येतुपरेत्व
रित्युक्तं ॥ अत्रहेत्वाधाप्याचारो दृश्यते ॥ आपस्तंबानांतुपरदिने मुहूर्तमपिदर्शसत्वेत्रैवपित्र्य
ज्ञं ॥ तदाहापस्तंबः ॥ अमावास्यायां यदहश्चंद्रमसं न पश्यंति तदहः पिंडपित्र्यज्ञं कुर्वीत
तद्दति ॥ अस्य रुद्रदत्तव्याख्या पिंडैर्युक्तः पिंडयज्ञः पिंडपित्र्यज्ञः सचकर्मांतरं नतु दर्शशेषः ॥
यथावस्यति ॥ पिंडपित्र्यज्ञः स्वकालविधानादनंगस्यादिति ॥ तं च तदहश्चंद्रं न संपश्यंति
पंचदश्यां प्रतिपदि वा तदहः कुर्वीत ॥ यदहस्तयोः संधिस्तदहरित्यर्थः इति ॥ श्रीरामांडारोप्यहः ॥
पिंडपित्र्ययज्ञस्तु पर्वसंधिमदहोरात्रापराण्ह इति ॥ अतः पर्वसंधिदिने पित्र्ययज्ञः ॥ शतपथश्रु
तिरपि ॥ यदेवैषनपुरस्तान्नपश्चाद्ददृशेऽथपितृभ्यो ददातीति ॥ पर्वसंधिनेहिपूर्वंतः पश्चाद्वाचं
द्रो न दृश्यत एवेत्यर्थः ॥ सचापाढापि पित्र्ययज्ञमप्रस्य ॥ दृश्यमानेप्यपरश्वो भतेयजतइत्याह ॥
हेमाद्रिस्तु ॥ अमावास्याशब्दस्तिथिवचनएव ॥ दर्शोक्तापस्तंबस्तेयदुक्तं न पश्यदिति तत्र
यो भिप्रेतः ॥ आलंब्यतुदर्श्यां चंद्रस्यसात्त्वात्तु दर्शे पित्र्ययज्ञः ॥ तदुक्तं दर्शमाने पितरश्चतुर्द
श्यां प्रेक्षयेतिचेति कात्यायनोक्तेः ॥ दृश्यमानेऽप्येवमितिगोभिलोक्तेः ॥ यस्यां संध्यागतः सोमो
णाव्धमिवदृश्यते ॥ अपराण्हेक्षयस्तस्यां क्षीणो भवति चंद्रमाः ॥ अमावास्याष्टमी शेतुपुनः किल
भवेदत्तुरिति ॥ तेन सर्वेषुदर्शपित्र्यज्ञरहस्यचिवान् ॥ कर्कोपाध्यायैरपि अपराण्हे पिंडपित्र्ययज्ञः ॥ चं

दि

द्रा दर्शने अमावास्यायामिति कात्यायनसूत्रे दर्शनेन क्षयवोक्तः ॥ तस्मिन्नह्नि एतद्दातास्मिन्ने ॥
अतस्तन्मते चतुर्दशीयुक्तदर्शे पिंडपितृयज्ञे सति परदिने यागो ऽर्थात्सिद्धः ॥ तदेतत्सर्वं स्पष्टमपि
हेमाद्रिनिर्णयामृतव्याख्यानमापस्तंबेरतुल्यमुपगमात् कात्यायनापबोधायनादिविषयम् ॥ आश्वला
यनामपि शेषपर्वीकि पिंडपितृयज्ञः ॥ तथा च सूत्रे ॥ अमावास्यायामपराह्णे पिंडपितृ
यज्ञ इति ॥ अत्र नारायणवृत्तिः ॥ अमावास्याशब्दः प्रतिपत्संधिदर्शयोः संधिवचनोप्यभाव
राह्णशब्दसमभिव्याहारात् सहोरात्रे वर्तते ॥ तस्यापराह्णे त्वह्नश्चतुर्थे भागे पिंडपितृयज्ञः कार्यः ॥
औपवासथ्ये यजनीये वाहनि ॥ यद्वा तु होरात्रे संदर्शितिथिः [illegible] धीः स्यात्प्रतिपद्यपचेज्यते ॥
तद्दलक्षयं पर्वणि षंतु पूर्वेद्युरिति नैवं तु पितृयज्ञः परस्तु कर्मप्रयोगे [illegible] ॥ अयं
च स्मार्तानिमतां स्मर्ते श्राद्धं व्यतिषंगेण कार्यः ॥ व्यतिषंगो नाम योः सहानुष्ठानं ॥ ए
तच्च स्थालीपाकेन सह पिंडपितृयज्ञं तु [illegible] इति सूत्रेष्टिकृत्ते ॥ एवं पर्वणि केचिदाहुः ॥ पूर्वेद्युरि
पिंडपितृयज्ञव्यतिषंगेण श्राद्धं सत्तापराह्णे केवलः पिंडपितृयज्ञः कार्यः ॥ इति सत्ताद्युक्त
न्वष्टकं च परवेद्युर्मासि मास्यपपर्वणि ॥ काम्यमासु दयेष्ट्यामेको द्दिष्टमथाष्टेममिल
दाहसहवेषु चतुर्थस्थालीपाकाद्युद्देशाग्नेश्चरणामिसत्ते दर्शश्राद्धे स्थालीपाकेनियतइ
तिगम्यते ॥ स्थालीपाकस्य पितृयज्ञ एवेति पूर्वदिने व्यतिषंगः सिद्धः ॥ प्रयोगपारिजाते तु वा
पिंडं श्राद्धादेरधिषंगाद्युक्तः ॥ किंतु तद्दर्शश्राद्धं स्थालीपाकविदस्तावहः ॥ तत्रत्यस्मरणेत्र संपूर्णदर्शे

विषयत्वात्॥ एवं च पर्वणि पूर्वदिने केवलं पितृयज्ञः॥ अतएवोक्तं रत्निरूला॥ नाग्नार्चैः
स्थालीपाकस्वेद्युते सर्वश्राद्धेषु प्रसंगादितिः॥ प्रयोगपारिजातोक्तिरप्येतद्विषयैव॥ प्र
र्वदिने च श्राद्धे ग्नौकरणमेव न पाणिहोमः॥ चतुर्थ्यो धेषु साग्निना॥ वाग्न्हौ होमो विधाय
ते॥ पित्र्यब्राह्मणस्याहस्ते स्यादुत्तरेषु चक्षुषा पतिपरिशिष्टे नियमात्॥ ननु लौकिकाग्नौ
पक्वस्य कथं श्राद्धाग्नौ होमः॥ नान्याग्नौ चावर्त्तव्यात्॥ तस्मात्स्वर्वेद्युः केवलं श्राद्धं न व्यतिषंगः॥
र इमे च चतुर्त्क्रमः॥ आहिताग्निनातु सर्वाधानिना र्धाधानिना वा संपूर्ले एवं जैवा दर्शे श्रौता
ग्नौ पृथगेव पितृयज्ञः कार्यः॥ ननु दर्शश्राद्धव्यतिषंगोति विस्तरभितेर्विरमामः॥ संप्रणेद
र्शे च विषमाहल्लोगाक्षिः॥ पक्षांते कर्म निर्वर्त्यैव स्वदेवं च साग्निकाः॥ पिंडपितृयज्ञं ततः कुर्या
ततोन्वाहार्यकं बुधः इति॥ पक्षांतं कर्मान्वाधानं॥ अन्वाहार्यकं दर्शश्राद्धं॥ अयमेव साग्नेर्जिव
सित्वकस्यापि पिंडपितृयज्ञकालोसेय॥ अस्यापि का[illegible]सेयनेन होमांतमन्वारं भो वेसाम्ना
शनात्॥ पिंडपितृयज्ञाकरणे प्राय श्चित्तमाह पाराशरमाधवीये कात्यायनः॥ ॥ पितृय
ज्ञात्ययेचैव वैश्वदेवात्यये पि वा॥ भोजने पतिताम्नस्य चरुर्वैश्वानरो भवेत्॥ ॥ प्र
स्तमनुस्मरामः॥ निरग्निकादिभिस्त्वमावास्यापराह्णव्याप्त्या ला भेकुतुपकालव्यापिनी
याह्या॥ अतएव जाबालमावास्याप्रति पंडितयज्ञापिवा॥ पित्र्ये कर्मणि विद्यायाह्या कुतुपकाला
क्रिति हारितोक्तेः॥ इदं च निरग्निकादिविषयं॥ सिनिवाल्येद्विजैः कार्या साग्निकैः पितृ

कर्मणि॥ त्रिभिः स्तद्वै कुहूः कार्या॥ तथा चानग्निके द्विजे रैलोगाक्षिवचनात्॥ अत्र च साग्नि
कोपि सुनाग्निरूपोतिमदनपारिजाते उक्तः॥ कुहुपक्षापराण्हव्याप्यलाभेतु वल्लः॥ अप
राण्हव्याप्ति द्वयोपि यदि दर्शस्तिथिक्षये॥ आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूः स्मृतेति जा
बालिनाभावे विधानं॥ ते मते साग्नेनापराण्हव्याप्तिन्यैव कुहूरव्या॥ तिथिसाम्ये वृद्धिक्षयेः समव्या
प्तौ खर्वादीनां निर्णयः॥ वैषम्ये धिक्का॥ दिनद्वयेपराण्हस्पर्शे कुहूपव्यापिनीति माधवः॥ इदमेवयु
क्तं॥ सिनीवाली दृष्टचंद्रा॥ तथा च व्यासः॥ दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृतेति॥ पूर्व
दिने परदिने च वल व्याप्तित्वे सैव ग्राह्या॥ अंशव्याप्तित्वे वैषम्ये धिककालव्यापिनी ग्राह्या॥ दिनद्व
येंशतः समव्याप्तौ तिथिक्षये खर्वा दृष्टौ साम्ये च परा॥ तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृ
ता॥ साम्ये पि च कुहूर्ज्ञेया वेदवेदांगवेदिभिरिति मदचेतोपवचनात्॥ दिनद्वये सत्त्वे कुहूपव्याप्ति
त्तु विति थिवृद्धा वैव भवतासनंतरवचनासरे वेति॥ दिनद्वये पि कुहूपव्याप्त्यभावे पूर्वैव॥ तदा
ह बौधायनः॥ घटिकैकाप्यमावास्या प्रपत्स्यभवेद्यदा॥ भूतविद्धापि कर्तव्या देवे पित्र्ये च कर्मणि॥
प्रतिपत्सु घटिकैकापि कर्मकाले यदि नास्तीति सर्वे॥ कुहूपस्तु॥ अन्हो मुहूर्ता विज्ञेया दश पंचैव स
र्वदा॥ तत्राष्टमो मुहूर्तो यः स कालः कुहूपः स्मृत इति मात्स्योक्तेः॥ तुलादानपितृदेवतासर्यौपत्रा
सादौ तु पराग्राह्येस्त्यत्र विस्तरः॥ दर्शे च मासिकवार्षिकादिश्राद्धमासोकादर्शे विरोध उक्तः॥ द
र्शस्य॥ चोदकं भस्यदर्शमासिकयोरपि॥ नित्यस्य चाब्दिकस्यापि दर्शिकाधिकयोरपालका॥

सपाते देवमेदाध्वा तु युग्मं समाचरेत्॥ निमित्तानियतिश्चात्र प्रवृत्त्यनुष्ठानकारणमिति॥
॥ ॥ निर्णयदीपिकायां॥ ॥ नष्टे चंद्रे यदा काले क्षयाहदिवसेपि वा॥ एवमेव क्षय
श्राद्धं कुर्यात्प्राग्दर्शकर्मणः॥ धर्मप्रवृत्तावपि॥ दर्शे प्रत्याब्दिके श्राद्धे प्राप्ते स्याच्चेदेकदेवत्यं॥ आ
दौ प्रत्याब्दिके श्राद्धं कुर्याद्दर्शं ततः परं॥ परमिति॥ अमाश्राद्धं चाग्निपत्नीकोपि कुर्यात्॥ ॥
श्राद्धं स्थलपाके॥ अमावास्येष्टकाकृष्णपक्षपंचदशी बुधैः॥ सपत्नीकस्य॥ एतच्चाग्निपत्नीकोपि
कुर्यात्तस्येष्टपर्वसु॥ श्राद्धं साधारणं नाम सर्वकामफलप्रदं॥ भार्याविरहितोप्येतत्प्रवासस्थोपि नि
त्यशः॥ शूद्रोप्यमंत्रयः कुर्यादनेन विधिना बुधः इति मात्स्योक्तेः॥ अमाश्राद्धाकरणे प्रायश्चि
त्तमुक्तं स्मृत्यंतरे॥ न्यूनं ऋग्वाचं प्रमहे प्रराम तेमे प्रशांतवारं दिने दिने॥ अमाश्राद्धं यदा नास्ति
तदा संस्मरणमिति तत्॥ अत्र च साग्निकरणे करणे॥ साग्निरग्नावनग्निस्तु द्विजपाणाव
थवा॥ कुर्यादग्नौ क्रियानित्यलौकिके नेति निश्चलमिति स्मृतिर्वा कामुदाहृत्य सत्येहवरवी सन्तो
पासनस्याग्निलभार्याविधुरस्य वाग्निरहितस्तस्य पाणौ जलादौ वा होम इति
व्याचक्षते॥ मदनपारिजातेप्येवम्॥ ॥ इदमेव साग्निकानग्निकस्वरूपं ज्ञेयं॥ ॥ अथ
ग्रहणनिर्णयः॥ ॥ तत्र चंद्रग्रहणे यस्मिन्यामे ग्रहणं तस्मात्पूर्वं त्रियामं न भुंजीत॥ सूर्यग्रहणे
तु प्रहरचतुष्टयं न भुंजीत॥ सूर्यग्रहे नाश्नीयात्पूर्वं यामचतुष्टयं॥ चंद्रग्रहे तु यामांस्त्रीन्बालवृ
द्धातुरैर्विनेति माधवीये वृद्धगौतमोक्तेः॥ ग्रहणं तु भवेदिंदोः प्रथमादधियामतः॥ भुंजीत

३३

वर्त्तमानात्सर्वं प्रथमे प्रथमादर्धरात्रिमार्वं ये यात्ते स्वा॥ श्राधिका भौजु ध्वं॥ ननु चंद्रग्रहे यामिच
तुष्टयनिषिधं उच्चैतान्न तु सूर्यग्रहे॥ सूर्योदयामाङ्भोजनाभावे॥ मेवं॥ वचनस्य प्रथमेया
मे सूर्यग्रहे सति पूर्वं चतुःपूर्वरात्रे भोजननिषेधपरत्वात्॥ चंद्रग्रहविशेषमात्रमाधवीये वृद्ध
वसिष्ठः॥ ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेदिति॥ द्वयोर्ग्रस्तास्ते तु माधवीव्यासः॥
अमुक्तयोरस्तगयोरद्याद्दृष्ट्वापरेहनीति॥ ॥ विष्णुधर्मे॥ ॥ अहोरात्रं न भोक्त
व्यं चंद्रे स्वर्यग्रहो यदा॥ मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम्॥ अहोरात्रनिषेधः सूर्यस्ता
स्ते॥ मदनरत्ने गार्ग्यः॥ संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ॥ तदहर्नैव भुंजीत रा
त्रावपि कदाचन॥ सायं संध्यायां तत्र स्यग्रस्तास्ते पूर्वेह्नि रात्रौ च न भोक्तव्यं॥ प्रातः संध्याचंद्र
स्य ग्रस्तास्ते रात्रौ उत्तरेह्नि न भोक्तव्यमित्यर्थः॥ चंद्रग्रस्तास्ते उत्तरदिने संध्याहोमादौ नदो
षः॥ तदाहोशनाः॥ ग्रस्ते दास्तंगते त्विंदौ ज्ञात्वा मुक्त्यवधारणं॥ स्नानं होमादिकं भुंजीयादुदये
पुनः॥ ॥ एतदनाहिताग्निविषयम्॥ अपले व्रतोपायनीयमश्नीत इति कौशायनोक्तेः॥
व्रतस्याग्नौ तत्से न विहिते हेन च प्रबल्हत्वात्॥ अर्द्धं व्रतं कुर्यादिति निर्णयदीपः॥ रागग्रासभो
जने कालनियमो युक्तः॥ तेन ज्वरादावि न भोजन इति कर्कानुसारिणः॥ बालवृद्धातुराणां
तु ग्रहणयामास्सर्वमेकयामो निषिद्धः॥ सायाह्ने ग्रहणं चेत्स्यादपराह्णे न भोजनम्॥ अ
पराह्णे न मध्याह्ने मध्याह्ने न तु भोजनम्॥ भुंजीत भोजनं चेत्स्यान्न पूर्वं भोजनं त्रियते मार्कं

व्यं

३३

३४ ष्ठेयोक्तेः॥ इदं च बाह्यादिविषयं॥ बालवृद्धातुरैर्दिनेतिपूर्वोक्तेः॥ वेधकाले ग्रहणे वा
पक्वमन्नं त्याज्यम्॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने॥ स्नात्वा कर्माणि कुर्वीत शृतम
न्नं विवर्जयेत्॥ इति हेमाद्रौ वृद्धगौतमात्॥ ग्रस्तमिति तदेतदरीतस्यापलस्त
रं॥ एवमाद्रेषु यच्छिद्रं ग्रहे पर्युषितं यदि तिमितासुराणां वचनात्तत्र भार्गवार्चन
दीपिकायाम्॥ ज्योतिर्निबन्धे च मेधातिथिः॥ आरनालं पयस्तक्रं दधि स्नेहाज्यपावि
तम्॥ मणिकरचोदकं चैव न दुष्येद्राहुसूतके॥ प्रयन्वयीमुक्तापल्यां॥ अन्नं पक्वमिहत्या
ज्यं स्नानं सवसनं ग्रहे॥ वारितक्रारनालादि तिलदर्भैर्न दुष्यति॥ जलेवदोषाभावांग
विषयः यतोपि लजले पाहापादरुघ्र समाचरेदिति तत्रैव चतुर्विंशतिमतेन जल
स्य दोषोक्तेः॥ ॥वेधकाले ग्रहणे वा प्रायश्चित्तमुक्तं माधवीये कात्यायनेन॥
चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति॥ तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यति॥
ग्रहणे यत्रिरात्रमेकरात्रं चोपवासः श्रेयार्थिना कार्यः॥ एकरात्रमुपोष्यैव स्नात्वा दत्त्वा च श
क्तितः॥ कं तु कान्दिवसस्यनिर्वृत्तिपक्कोमरातः॥ त्रिरात्रं समुपोष्यैव ग्रहणे चंद्रसूर्ययोः॥
स्नात्वा दत्वा विधिवन्मोदते ब्रह्मणा सहेति हेमाद्रौ लैंगोक्तेः॥ इदं च पुत्र
तिरिक्तविषयं॥ आदित्येहनि संक्रान्तौ ग्रहणे चंद्रसूर्ययोः॥ पारणं चोपवासं च न कुर्या
त्पुत्रवान्गृही इति जैमिनिवचनात्॥ यदा ग्रहणं च स्यादिति पूर्वोक्तमार्कंडेयवचनात्॥ ३४

संगवे सोऽयोन्हे स्मीयाछ्वारदे संगवादधः ॥ मध्याह्ने परतो स्मीयां त्रोपवासोरश्यिते
इति स्मृतेश्चेति हेमाद्रिः ॥ शाद्रदोपराण्हः ॥ माधवमते तु पुत्रिणोपि तत्रोपवास एव ॥
अहोरात्रे न भोक्तव्यमिति पूर्वोक्तनिषेधस्य तेनापि पाळनायत्वात् ॥ उपवासनिषेध
स्तु व्रतरूपोपवासपरः ॥ रवौ कादशीनिषेधइति ॥ मदनरत्नेप्येवम् ॥ इदमेव च युक्तं ॥
वर्द्धमानस्तु अहोरात्रारात्रन भोक्तव्यमिति शातातपीये ग्रोस्सूर्यचंद्रमसोर्लो कनक्ष
यान्यातिमानवइति फलश्रुतेर्मुक्त्यदर्शउपवासः कार्यः ॥ न त्वयं निषेध रसाह ॥ तन्न ॥
व्रतत्वेपि प्रागुक्तविष्णुधर्मेनिषेधाबश्याभावात् ॥ तथा च व्यासः ॥ रविग्रहः सूर्यवारे
सोमे सोमग्रहस्तथा ॥ चूडामणिरितिख्यातस्तत्र दत्तमनंतकम् ॥ वारेष्वन्येषु यस्तु
ग्रहणे चंद्रसूर्ययोः ॥ तत्पुण्यं कोटिगुणितं योगे चूडामणौ स्मृतम् ॥ अत्र चान्यं तत्
पोस्नानं न कुर्यात् ॥ ग्रस्तमात्रे भवेत्स्नानं ग्रस्तो होमो विधीयते ॥ मुच्यमाने भवेद्दानं मु
क्ते स्नानं विधीयते ॥ इति हेमाद्रौ वचनात् ॥ स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनम्
ति ब्रह्मवैवर्तात् ॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने ॥ सचैलं तु भवेत्स्नानं सूतका
न्नं तु वर्जयेत् इति वृद्धवसिष्ठोक्तेश्च ॥ सचैलत्वं मुक्तिस्नाने परं मदनरत्ने ॥ भार्गवा
र्चनदीपिकायां चतुर्विंशतिमते ॥ मुक्तौ यस्तु न कुर्वीत स्नानं ग्रहणसूतके ॥ स सूतकी
भवेत्तावद्यावत्स्यादपरो ग्रहः ॥ इदं च स्नानममंत्रकं कार्यमिति स्मृतिसारावल्याम् ॥ नन्वती

३५

र्थविशेषो भारते ॥ गंगास्नानं न तुल्यं तद्ग्रहणे चंद्रसूर्ययोः ॥ महानदीषु मान्यासु स्नानं
कुर्याद्यथाविधिः ॥ महानदीषु पौमासविशेषे लोकविश्रुतेः ॥ प्रयागं देविका रेवासं
निहसाचपारलम् ॥ सरस्वती चंद्रभागा कौशिकी तापिका तथा ॥ सिंधुर्गंडकिका
चैव शरयूः कार्तिकादितः ॥ तलहेमाद्रौ स्पष्टम् ॥ व्यासः ॥ इंदोर्लक्षगुणं पुण्यं रवेर्द
शगुणस्तथा ॥ गंगातोये तु संप्राप्ते इंदोः कोटिरवेर्दश ॥ गवां कोटिसहस्रस्य यत्फ
लं लभते नरः ॥ तत्फलं लभते मर्त्यो ग्रहणे चंद्रसूर्ययोः ॥ असंस्पृशेतु माधवा येसं
रवः ॥ वापीकूपतडागेषु गिरिप्रस्रवणेषु च ॥ नद्यो नदे देवखातेषु सरसीषूद्धृतांबुने ॥
उष्णोदकेन वा स्नायाद्ग्रहणे चंद्रसूर्ययोः ॥ अत्र तारतम्यमाह मार्कंडेयः ॥ शीतमुष्णो
दकात्पुण्यमपारक्यं परोदकात् ॥ भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं ॥ ततोपि सा
रसं पुण्यं ततः पुण्यं नदीजलम् ॥ तीर्थतोयं ततः पुण्यं महानदीषु पावनम् ॥ ततस्त
तोपि गंगांबु पुण्यस्तत्तोंबु धारितं ॥ उष्णोदकं मातुराद्वेषयन्त्र ॥ तथा ॥ गोदावरी महापु
ण्या चंद्रे राहुसमन्वितम् ॥ चंद्रे च राहुणाग्रस्ते तमो भयमाह मनुने ॥ नर्मदातोयसंस्पर्श
स्तत्तुल्या भवेति ॥ दृष्वा चंद्रोदये ॥ प्रभासखंडे ॥ गावो नास्ति ला धान्यं रत्नानि कनकं मही ॥
संप्रदाय कुरुक्षेत्रे यत्फलं लभते नरः ॥ तदिंदुग्रहणे भो धौ स्नानाद्भवति षण्मुखः ॥ तत्रैव
सोरघुरालेव पिस्नानमुपक्रम्य ॥ दानानि यानि लोकेषु विख्यातानि मनीषिभिः ॥ तेषां फ

३५

लभवाप्नोति ग्रहणे चंद्रसूर्ययोः॥ देवीपुराणे॥ गंगाकनखलं पुण्यं प्रयागं पुष्करं तथा॥
कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे॥ स्नानसंकल्पे स्मरणं वा कार्यम्॥ स्मृत्यर्थसारेऽ
प्युक्तं ह स्नानं सर्वाघनाशनम्॥ स्कांदे॥ गोमेधपुण्यं पुष्पालासौ ग्रामणे लभेत॥ स्नाता
वाजीमखपुण्यं प्राप्नुयाद् विचारतः॥ रविचंद्रोपरागे च अयने चोत्तरे तथेति मार्कं
डेयोक्तेः॥ अत्र श्राद्धमप्युक्तं गार्ग्येः॥ चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्॥ तेनैव सक
लापृथ्वी दत्ता विप्रस्य वै करे॥ नारदे॥ सर्वस्वेनापि कर्तव्यं श्राद्धं राहुग्रणाके॥ अकुर्वाण
स्तु नास्तिक्यात्पंके गौरिव सीदति॥ विष्णुः॥ राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकम्॥ इ
दं चामान्नेन हेम्ना वा कार्यं नान्नेन॥ आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा॥ आमश्राद्धं
प्रकुर्वीत हेम्ना श्राद्धमथापि वेति शातातपोक्तेरिति हेमाद्रिमाधवादयः॥ अपरार्केस्तु॥ ॥
एतद्द्विजानां पाकाभावे द्रष्टव्यम्॥ तीर्थश्राद्धवत्॥ पाकाभावे द्विजातीनामामश्राद्धं विधीयत
इति सुमंतूक्तेः॥ सैंहिकेयो यदा सूर्यं ग्रसते सर्वसिंधुषु॥ गजच्छाया तु या प्रोक्ता तस्यां श्राद्धं प्र
ये कल्पयेत्॥ घृतेन भोजयेद्विप्रान् घृतं भूमौ समुत्सृजेदिति दिति नारायणोक्तेश्च साहसात्॥ विज्ञाने
श्वरोऽप्याह॥ ग्रहणश्राद्धे भोक्तुर्दोषो दानं तु सर्वस्वमुदय इति॥ सूतके मृतके कुंडे ग्रस्ते स्मिन्
शशिभास्करे॥ छायायां हस्तिनश्चैव न भुंजीत पुरुषो दिसादि आपस्तंबेन भोजनमपि
षेधाश्च॥ अयं च निषेधः श्राद्धभोक्तुः॥ हस्तिच्छाया साहेच यत्र॥ अत्र ग्रहणनिमित्त

४६

कम्श्राद्धे नैमित्ते आमासंक्रासादिनिमित्तकानां सिद्धिः ॥ दर्शे कालव्याप्योरपि तिथिकालादर्शोक्ते ॥
श्राशौचमध्येपि स्नानश्राद्धादिकार्यमेव ॥ सूतके मृतके चैव न दोषो राहुदर्शने ॥ ताव
देवस्य शुद्धिर्यावन्मुक्तिर्न दृश्यत इति माधवीये वृद्धवसिष्ठोक्तेः ॥ स्मार्तो कर्मपरित्यागो
राहोरन्यत्र सूतके श्रौते कर्मणि तत्कालं स्नानात् शुद्धिमवाप्नुयादिति ॥ व्याघ्रपादोक्तेः ॥ ॥
कालादर्शे अंगिरः ॥ सर्वेषां सूतके पि मृतके राहुदर्शने ॥ स्नात्वा श्राद्धं प्रकुर्वीत दानं
शाद्धं च विवर्जितम् ॥ मदनपारिजाते वृद्धमनुः ॥ रजस्वलास्तु मार्गवार्चनदीपिकायाम् ॥ स
र्योदयपनिर्णये ॥ नसूतकादिदोषोनास्ति ग्रहे होमजपादिषु ॥ ग्रस्ते स्नायादुदक्यापि
तीर्थोद्धृतवारिणेति ॥ अत्र स्नाने नैमित्तिके नारीणां तीर्थे नारी यदि रजस्वला ॥ पात्रांतरितनोये
न स्नानं कृत्वा व्रतं चरेदित्यादि मिताक्षरोक्तो विधिर्ज्ञेयः ॥ ॥ तथा ग्रहतोराचाव
पिश्राद्धादिकार्यम् ॥ ॥ ग्रहणोद्वाहसंक्रान्तियात्रार्तिप्रसवेषु च ॥ स्नाने नैमित्तिके
ज्ञेयं सञ्चारपितद्दिष्यत इत्यपरार्कध्यासोक्तेः ॥ चंद्रग्रहे तु यात्रा श्रौतस्नानं प्रशस्यत इति
५ देवलोक्तेश्च ॥ यदा तु ज्योतिःशास्त्रगम्यो दिने चंद्रग्रहे रात्रौ सूर्यग्रहस्तत्स्नानादि न का
र्यम् ॥ सूर्यग्रह यदा रात्रौ दिवा चंद्रग्रहस्तथा ॥ तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचि
दिति षट्त्रिंशन्मतात् ॥ ॥ ग्रहणदिने वार्षिकश्राद्धप्राप्तौ तु प्रयोगपारिजाते
गोभिलः ॥

४६

दर्शे रविग्रस्तेपि शौः प्रसाब्धि कस्तुपस्थितम्॥ अत्रं नासंभवेतेस्मात्कुर्याद्दानेन वास्तुत इति॥
अत्र दर्शे रविग्रस्ते पित्र्यसुलब्दाः प्रदर्शनार्थाः॥ न्याय साम्यात्॥ तेन चंद्रग्रहणेपि दिसापिंडाभावेदिवा
र्षिकस्य च्छन्दितादिने कार्यमिति मदनपारिजाते व्याख्यातम्॥ पृथ्वीचंद्रोदयेप्येवम्॥ तेनय
नि॥ आमश्राद्धं मेतु वत्तमाससंवत्सरादिति इति॥ अंभेन वाब्दिकं कुर्यात् ग्रहेन्नाभावामेन न ब्राचेदिति
मरालौगाक्षिप्यादिवचनान्नियहपादिनातिरिक्तविषयाणि॥ निर्णयामृतेप्येवम्॥ ग्रहणेतु दि
तीयेन्हि राजोदोषात्तु पंचमे॥ तथाग्रस्तोदये यदा चंद्रस्य स बंधस्तु पास्थितम्॥ तद्दिने चोपवा
सस्यात्स्य सब्दं तु परेहनि॥ तथाग्रस्तोयेवास्तप्णानान्नच्चुरंविंदु शभुक्तियदि॥ ग्रसबंधु
लदाकार्यैपरेहन्येवसर्वदा॥ तथा॥ चंद्रसूर्योपरागेचतथाश्राद्धं परेहनि स्वादिवचनानि
तानि महानिबंधपुष्पायनुपलंभानि मूलानि॥ प्रसक्तरपूर्वो नरनिबंधेषुतद्दिन एव श्रा
द्धमुक्तनिसतं॥ ॥ग्रहणादिसप्तदिनपर्यंतं संरामगोपाल्यायागमदीक्षोचका शिवा
र्चनंच चंद्रिकायांशानार्णवे॥ ॥मंत्राधारमणं कुर्यात् ग्रहणेचंद्रसूर्ययोः॥ ग्रहणा
द्यपिदैवेशि कालससवदिनावधानि॥ ॥रत्नसागरे॥ सतीर्थे वैविधुयासते
लं कुद्दामनपर्वणि॥ मंत्रदाक्षां प्रकुर्वाणो मासर्क्षदिनशोधयेत्॥ अत्र सूर्यग्रहणतुरयं॥
सूर्यग्रहणकालेतु नान्यदन्वेषितं भवेत्॥ सूर्यग्रहणपर्वेन समोनान्यस्तदाचन॥ न मासति
थिवारादि शोधनं सूर्यपर्वणि॥ इति॥ तत्रैवकालोपबृंहणात्॥ चंद्रग्रहेतुयादीक्षा वर्णमाला

भिचारिणाम्॥ वर्णस्थस्य च यदा दीक्षादारिभ्यं सप्तजन्मस्त्वीति तत्रैव योगिनां तत्रैव
निषेधाच्च॥ प्रतिपजन्मराशयादौ निषिद्धम्॥ तदुक्तं ज्योतिषे॥ त्रि ३ षट् ६ दश १० यो ११
पगतं नराणां शुभदं स्याद्ग्रहणं रविंदोः॥ द्वि २ सप्त ७ नंद ९ इषु ५ मध्यमं स्याच्छेषे
ष्वनिष्टं कथितं तनुनां त्रैरिति॥ आयं एकादश ११ नंदः नव ९ इषुः पंच ५ मदनस्तेनगाः॥
जन्म १ सप्त ७ ष्ट ८ रिष्फां १२ क १ दशम १० स्थे निशाकरे॥ दृष्टोरिष्टोग्रदो राहुर्जन्मर्क्षे
निधने ८ विचेतिः ९ फ द्वादश १२ अंकमनव ९ निधनं अष्ट ८ सप्तमतारा॥ दृष्टो चं
द्रोदयो विधुभर्मे॥ यं भक्षत्र गतो राहुर्ग्रसते राशिभास्करौ॥ तज्जातानां भवेत्पीडा ये नराः
शांतिवर्जिताः॥ ॥ तत्रैव गुरुणां तरे॥ सूर्यस्य संक्रमे वापि ग्रहणे चंद्रसूर्ययोः॥ यस्य
त्रिजन्मक्षेत्रं च तस्य रोगोथवा मृतिः॥ स्वर्णेन वाथ पिष्टेन कृत्वा सर्पस्य चाकृतिं॥ श्रोत
णा पद्दत्तस्य न रोगादीश्च तत्कृतिः॥ जन्मनक्षत्रं तत्र वै नरेश्च जन्मनक्षत्रे मिलत्यते॥
जन्मदशमैकोनविंशति तारा इति केचित्॥ सर्पस्य तदाकारस्य राहोरिष्टदः॥ अद्भुतसाग
रे मार्गवः॥ यस्य राजस्य नक्षत्रे स्वर्भानुरुपरज्यते॥ राज्यभंगं सुहृन्नाशं मरणं चात्र निर्दिशे
त्॥ राज्यस्य नक्षत्र अभिषेकेन क्षत्रमिति तत्रैव व्याख्यानं॥ मार्गवश्चैव दीपिकायाम्॥
ज्योतिः सागरे॥ सौवर्णं कारयेन्नागं पलेनार्द्धपलार्द्धतः॥ तेनार्द्धेन पलार्द्धया प्रवालं मौ
क्तिकं न्यसेत्॥ ताम्रपात्रे निधायाथ घृतपूर्णे विशेषतः॥ कांस्ये वा कांतिलोहे वा अन्यदद्या
त्तद्दक्षिणाम्॥ नागतत्त्र्यक्षमयं स्त्र्ये ग्रहे बिंबं च हेम जम्॥ तुरंग रथ भूमि चैतिल सर्प रु

कांचनम् ॥ कालविवेकेपि ॥ सुवर्णनिर्मितं नागं सतिलं कांस्यभाजनं ॥ सदक्षिणं स
वस्त्रं च ब्राह्मणाय निवेदयेत् ॥ सौवर्णं राजतं वापि बिंबं कृत्वा स्वशक्तितः ॥ उपराग
भवक्लेशच्छिदे विप्राय कल्पयेत् ॥ मंत्रस्तु ॥ नमो भय महाभीम सोमसूर्यविमर्दन ॥ हे
मताराप्रदानेन मम शांतिप्रदो भव ॥ विधुंतुद नमस्तुभ्यं सिंहिकानंदनाच्युत ॥ दाने
नानेन नागस्य रक्ष मां वेधजाद्भयात् ॥ इति अत्र शांतिरप्युक्ता हेमाद्रौ मात्स्ये ॥ यस्य रा
शिं समासाद्य भवेद्ग्रहणसंभवः ॥ स्नानं तस्य प्रवक्ष्यामि मंत्रौषधिसमन्वितम् ॥ चंद्रो
परागं संप्राप्य कृत्वा ब्राह्मणवाचनं ॥ संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः ॥
पूर्वमेवोपसंगम्य समानीयौषधादिकं ॥ स्थापयेच्चतुरः कुंभान् अव्रणान् सागरानिव ॥
गजाश्वरथ्यावल्मीकसंगमह्रदगोकुलात् ॥ राजद्वारप्रदेशाच्च मृदमानीय निक्षिपे
त् ॥ पंचगव्यं पंचरत्नं पंचत्वक्पंचपल्लवम् ॥ रोचनं पद्मकं शंखं कुंकुमं रक्तचंदनं ॥ शु
क्तिं स्फटिकतीर्थांबु सीतसर्षपगुग्गुलम् ॥ मधुकं देवदारुं च विष्णुक्रांतां शतावरीं ॥ ब
लां च सहदेवीं च निशाद्वितयमेव च ॥ एतत्सर्वं विनिक्षिप्य कुंभेष्वावाहयेत्सुरान् ॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥
योसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ॥ सहस्रनयनश्चंद्रग्रहपीडां व्यपोहतु ॥ मु
खयः सर्वदेवानां सप्तार्चिरमितद्युतिः ॥ चंद्रोपरागसंभूतामग्निः पीडां व्यपोहतु ॥ र

५८

क्षोय: कर्मसाक्षी लोकानां धर्मो माहिषवाहन:॥ यमश्चंद्रोपरागोत्थां ग्रहपीडां व्यपो
हतु॥ रक्षोगणाधिप: साक्षात् नीलोंजनसमप्रभ:॥ खड्गहस्तोतिभीमश्च ग्रहपीडां व्य
पोहतु॥ नागपाशधरो देवः सदा मकरवाहनः॥ स जलाधिपतिर्देवो ग्रहपीडां व्यपोह
तु॥ प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः॥ वायुश्चंद्रोपरागोत्थां ग्रहपीडां व्यपो
हतु॥ योसौ निधिपतिर्देवो खड्गशूलगदाधरः॥ चंद्रोपरागकलुषं धनदोत्र व्यपोह
तु॥ योसाविंदुधरो देवः पिनाकी वृषवाहनः॥ चंद्रोपरागपापानि स नाशयतु शंक
रः॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च॥ ब्रह्मविष्ण्वर्करुद्राश्च दहंतु मम
पातकम्॥ एवं साधारयेद्द्वो मंत्रैरेभिश्च वारुणैः॥ एतानि बलधामंत्रान् स्वर्णपट्टे वि
लेखयेत्॥ ताम्रपट्टे थवा लिख्य नवदस्त्रेणैव च॥ मस्तके यजमानस्य निजध्युस्तो द्वि
जोत्तम:॥ कलशानद्रव्यसंयुक्तानानारूपसमन्वितान्॥ ग्रहीत्वा स्नापयेद्रुद्रं मद्रपी
वोपरि स्थितं पूर्वे रेवत्तिमंत्रैस्तु यजमानं द्विजोत्तम:॥ अभिषेकेलल कुर्यान्मंत्रैर्वारुण
सत्तमै:॥ आचार्यं वरयेत्स्नात्वा एष दंनिवेदयेत्॥ आचार्यदक्षिणां दद्यात् गोदानं च स्वशक्ति
त:॥ होमं चापि प्रकुर्वत तिलैर्व्याहृतिभिस्तथा॥ दानं च शक्तितो दद्यात् द्विजेदासने नो
हितम्॥ सूर्यग्रहे सूर्यनामयुक्तान्मंत्रांश्च कीर्तयेत्॥ अनेन विधिना यस्तु ग्रहणे स्नान
माचरेत्॥ न तस्य ग्रहणे दोषः कदाचिदपि जायते॥ ॥ इति ग्रहशांतिः॥ ॥

५८

मार्गवार्धेनहेमाद्रौ कात्यायनः ॥ अस्तादिकालः ॥ सर्वेप्यास्तच्छिन्नं वा ध्वंसं स्वच्छे तैलांबुदर्पणे ॥
पा ग्रहणं तु बुधो ज्ञात्वा न पश्येत पटं विना ॥ तथा मंगलकृत्येषु वेधविशेषो हेमाद्रौ ॥ अत्रैव
स्योदितो द्वयं च दिनानां दशकं भवम् ॥ मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोः ॥ भवारं
न तं वैदेवोक्तं ॥ द्वादश्यादित्रितीयायां तो वेधः ग्रहेंदुसूर्ययोः ॥ एकादश्यादितः शौरे च
तुर्दश्यंतः प्रकीर्तितः ॥ रुद्रंचप्रवर्णव्यासः ॥ ग्रहणं खंडं तु ग्रहे त्रयोरिति तत्रैवोक्तेः ॥ इदं च
ग्रस्तास्तेत्रिदिनं सर्वं मितिनारदेन विशेषोक्तेः ॥ ग्रस्तास्तेमित्यग्रहणं परस्था
वोतिनिंदवैष्णवनः ॥ ग्रहणे सति संक्षाज्यं मंगलेषु सहस्रये ॥ यावज्ज्वरविना शुद्धा
सुचनं संदर्भ्यशाएवन ॥ अन्यानि ह्यग्नेयदिमं जलानि फल वर्णविकारादिफलं च दैव
ज्ञेभ्योऽवसेयम् ॥ पुरश्चरचंद्रिकायाम् ॥ चंद्रसूर्योपरागे च स्नात्वा प्रयतमानसः ॥ स्पर्शादि
मोक्षपर्यंतं जपेन्मंत्रं समाहितः ॥ जपाद्दशांशतो होमस्तथा होमाच्च तर्पणम् ॥ तर्पणस्य
दशांशेन मार्जनं कथितं किल ॥ तत्रैव देवतारूपं ध्यात्वा आत्मानं प्रपूज्य च ॥ नमोंतं मंत्रमु
च्चार्य तदंते देवताधियाम् ॥ द्वितीयासामहंप्रस्रावदभिषिंचाम्यनेन तु ॥ तोयैरंजलिना
मूर्ध्नि रभिषिंचेत्सकृत्पूर्वत ॥ मार्जनस्य दशांशेन ब्राह्मणान्भोजयेत् ॥ जपोर्चाहुतं तो
होमस्तर्पणं चाभिषेचनम् ॥ भूदेवपूजनं पंचप्रकारोक्ता पुनः क्रिया ॥ होमाशक्तौ जपं

कुर्याद्धोमसंख्या चतुर्थांशं॥ एवं कृते तु मंत्रस्य जायते सिद्धिरुत्तमा॥ ग्रहणं संख्या संग्र
हरणे ग्रहे परतिग्रहश्राद्धान्यन्नं त्वमुच्यते॥ तत्प्रारब्धस्य नो॥ प्रतिग्राहे भुक्तशेषेन भक्ष्यः पुत्रपो
त्रवेत्॥ तथा विमनसंस्तु ध्यै स्नात्वा श्चितं समाचरेत्॥ तत्स्पर्शदृष्टं पक्वं भोदेववैनसमन्वितं॥
सत्रयवाज पेक्षंत्यं च हालस्से तत्तकं॥ वापिकूपतडागादि खनने नैव विसृजेद्धनमिति॥ एते
ने॥ यत्कृहितेना जर्जपे तिक्रमेणा ब्राह्मणाधनम्॥ तेस्यो संगेन हुध्यंति दाने नात्र पसे
वचैतिमन्त्रके तत्संगोत्तरं स्नायमिति दिक्॥ ग्रहणं तु रितस्य पूर्वकालिकद्रव्यस्य बाहुल्य
सं भवेत्ती नीतिरिष्टः॥ [illegible]॥ दास्येदमिति नो सर्वत्त्वं व्यंजस्य चिह्नं चेत्॥ अहोरात्रमि
ति क्रम्यतद्दाने द्विगुणं भवेत्॥ दर्शांतरं पर्वेतु स्याद्यस्तं चंद्रग्रहे भवेत्॥ सूर्यग्रहे सहस्रं तु प्र
र लोने न तत्कं स्यूतमिति॥ अत्र केचिद्वैद्दुत्त्या आहुः॥ ग्रहणस्य निमित्तत्वेन निमित्तस्य
प्रयोजकत्वात्॥ ज्योतिःशास्त्रादिना ज्ञातस्य ज्ञानस्य निमित्तत्वे प्राप्ते पि स्नानदानेत्वतः प्रा
द्व भवेत्तत् राहुदर्शने॥ चंद्रसूर्यपरागेषु यावद्दर्शगोचरे इति ना गुल्यादिवचने तु दर्शनं प्रयो
गाश्रादूर्ध्वं स्नानस्यैवोपसंहारन्याये निमित्तम्॥ अन्यथा दर्शोल्लक्षणस्यात्॥ तेन मेघा
च्छादने पौदीनां च जन्मनक्षत्रे सादिनिषिद्धदर्शनानां चस्मानश्राद्धादौ नाधिकार इति॥
कल्पतरुरप्याह॥ दर्शनः शब्देन चर्मक्षुः स्नानग्रहीतेन ज्ञानमात्रं॥ अतो ज्ञानस्य निमित्तत्वात् स
र्वान्निमित्तमहिम्नैव ज्ञानलाभेम दर्शनपदवैयर्थ्यापत्तेः॥ तेन चाक्षुषधी योग्या का

तत्पुण्ययोग्यत्वं च प्रत्यक्षनयनेयत्त्वाद्दृश्यज्ञानप्रतिबंधकराहित्यम्॥ तेन मेघच्छन्ने योग्यताभावान्न स्नानादीनि॥ ... यदि चाक्षुषज्ञानं विमित्तं स्यात्तदा॥ सूर्यस्य ग्रहोपरागे चौदिशांच ग्रस्तस्तथा॥ तत्रस्नानं कुर्यात् ददीद्दानंन च काचिदितिवाक्यार्थे स्यात्॥ चाक्षुषज्ञानोत्पादेन भाष्याभावात्॥ तत्सर्वं कर्ताचक्षु निषेधस्य न चेदं यत्ता स्तपर॥ रविचंद्रयोरस्तान्तर यात्रिदिनाय ग्रहणादितिवाध्यम्॥ स्वपदस्यग्रहपरत्वे धिकरणाय योत्रिमित्तपरत्वे च तद्ग्रहनिमित्तकस्नानेदे रस्तात्यागाप्य भावापत्तेः॥ अथ तंत्रे तिरात्रादिने उच्येतेसावे स्वदेवे निगुण भूतेअपि॥ ... तयोर्नैमित्तिकत्वे धिकरणत्वे वान्यत्र युक्तस्नानाद्यभावापत्तेश्च॥ विचने स्तेलोर्घ्यतमादि स्नानस्तु यंतं कदाचन॥ नोपरक्तं नवारिस्थं नमध्यं न भसो गतमिति मनुवचनं वो ध्येत॥ दृष्टो रिष्टो ग्रहो राहुरित्यादिस्या॥ न चात्रोविहितदर्शने निषेधात्र्यतिरस्तु दासनीयतापि न यु चेति वाच्यम्॥ दर्शनस्यानुवादेन विधेयत्वे क्षावात्॥ ... म॥ ॥ तत्वेवा वितृहृत्रकद्वयापत्तेः॥ ... सकृद्दर्शने विधानेन संकोचे ... त्॥ न तु मुक्तिं दृष्ट्वातः स्नायादितिमुक्तिस्नानेपि चाक्षुषज्ञानस्यानिमित्ततापत्तेः॥ ॥ ... ॥ ... तिचेत्॥ नाग्रस्तास्तेतयोः परेद्युरुदये दृष्ट्वा ह्यस्य॥ वहरेघुचिरिति दर्शनोत्तरं भोजनविधानादंधस्य पूर्ववेधकाल इवयादर्शने भोजननिषेधः

पत्तिः॥ मध्येपि स्नलस्यसुतरां यावच्च च्छ मासुपवासप्रसंगात्स्व॥ अथात्रलोलुपतया
लत्रस्नानमात्रंचरवक्ष्ये ततस्तुर्वं यिनिर्जलेन स्वीक्रियताम्॥ एतेन यत्नेन चिनुक्तस्पर्श
स्नानस्तुच्चिस्नानचयस्वदर्शनं तेनैव कार्यम्॥ आत्येनलाप्रसयेनसमानवर्त्येऋलानने
रिलितं नरस्ना॥ ॥ मूर्छार्ता हिनस्पृशास्तिः॥ द्रशेतहेस्यविशेषत्वाद्धहैमसंवद्विरह
यार्थेन॥ सिद्धिस्नानमात्रान्वादत्वेसर्वेश्रुस्छं॥ अंगुल्याधनादेश्ययेहत्याद्सावादर्श
नस्यर्थवत्त्वम्॥ नचोक्तयोगत्वनापिस्नाख्वी॥ दर्शनोत्तरमेष्ठत्रयोग्यता भावापसादा
नाद्यभावापत्तेः॥ तेनसतद्रेखावष्टेदेन ज्योतिः शास्त्रावेधलमेवयोग्यता धीन्याभ्या
रजसोदर्शनेनारित्रिरात्रमस्तुर्भवेत् रसत्राप्यधस्त्री लाभारोच्चाभावप्रसंगः॥ ॥
यत्तुवर्द्धमानेनोक्तम्॥ ॥ स्नानोत्तरं ह्यधिकारोनेस्नानकाले॥ स्नानकाले स्नाना
भावात्॥ एवं दर्शनोत्तरं मुक्तिपर्यंतमस्नानंमोग्यते तिलदपिमतिस्नानमात्रं॥ चतु
र्थिं स्नानेराख्यापमेव स्नाननिमित्तेन चाक्षुषम्॥ चंद्रस्तयेग्रहेनाघातुरस्मिन्नहनि
ह्रवेत॥ राहोर्विमुक्तविस्नाविस्नायनस्नात्वाभुंजीत सोजनमिति ग्रहुगोतमेनरवि
स्नायंति स्नानमात्रोक्तेः॥ ॥ मुक्तिंदृष्ट्वा तु भोक्तव्यं स्नानंकृत्वाततः परम्॥ मितिंदपिस्नान त
मात्रंपरम्॥ मेघमावदिदोषत्वयःरि[illegible] मुक्तिर्नदृश्यते॥ आकाशस्यतुलत्वाकंस्नात्वा
भुंजात वाग्यतइतिगौजनिवंधेवचनात्॥ मैवम्॥ अस्नानतस्यनिमित्तत्वाभावेनानि

विधिः॥ सति च प्रधानस्नानं विधौ तदंगदर्शनविधिः॥ एवमाधिकारे प्रयोजकत्वे च यो
ज्यम्॥ उक्तानां पूर्वकालविधौवाक्येन वाक्यमभेदात्॥ अन्यथा स्नानानंतरमपि दर्श
नमंगं स्यात्॥ नद्वितीयः॥ दर्शनविशिष्टनिमित्तवाच्यम्॥ आर्त्तिमात्रस्य हि निमित्तत्वे निमे
षाद्यार्जैरपि तत्तापच्चेन्नैनिमित्तत्वप्रसंगात्पुच्छविशिष्टोद्देशात्॥ इह तु ग्रहणमात्रस्यानिमि
त्तकत्वेन काचित् क्षतिः॥ तस्माद्दर्शनवाक्यानामयस्तास्तु विषयता॥ तोनस्य चार्थतः॥
प्राप्ते सर्वदेवनिमित्तम्॥ तेन मेघाच्छदने धारेस्य स्नानादि प्रवर्तते यत्र वेद बाह्ये संलोपे
न॥ ॥ इति ग्रहणनिर्णयः॥ ॥ अथ समुद्रस्नानम्॥ आश्वलायनः॥ ॥
समुद्रे पर्वसु स्नायाद् माघे च विशेषतः॥ पापैर्विमुच्यते सर्वै रमास्याः स्नानमाचरन्॥
स्तु भौमदिने स्नानं नित्यमेव विवर्जयेत्॥ ॥ भारते॥ ॥ अस्पृश्यः सागरो नित्यो
न स्प्रष्टव्यो कदाचन॥ अश्वत्थं संदर्वारं तु सागरं पर्वणि स्पृशेत्॥ ॥ पृथ्वीचंद्रोदये
स्कांदे॥ ॥ धुनाति पर्वणि स्नानाल्पदेशैः सरितापतिः॥ कदाचिदापि नैवात्र स्ना
नं कुर्याद पर्वणि॥ ॥ अस्यापवादः स्तत्रैव प्रभासखंडे॥ पर्वकाले च संप्राप्ते नदीनां सं
गमेषु च॥ सेतुबंधे तथा सिंधौ तीर्थेष्वन्येषु संकुलाः॥ एवमादिषु सर्वेषु मेध्येन्वेषु स्वक
र्मणि॥ तथा॥ विना मंत्रं विना पर्वस्तु रकुर्मा विना नरः॥ कुशाग्रेणापि देवेशी न स्प्रष्टव्यो
महोदधिः॥ तथा॥ न कालनियमः सेतौ समुद्रस्नानकर्मणि॥ तद्विधिस्त्वन्नत्रैव॥ विप

मित्तमुद्दिश्ये वस्नानालाभे वाक्यभेदप्रसंगात् ॥ किंच यस्तास्तेतदोः परेद्युरुदये दृष्टाभ्यवत
रे द्युचिरेस्नादिवाक्यभेदप्रसक्तेः ॥ चाक्षुषज्ञानानन्यथानुपपत्तेर्वार्थादुदयस्नानसिद्धिः ॥
किंच ॥ दर्शनाविशेषणत्वमुपलक्षणत्वमानाद्युः ॥ दर्शनाबाधिन्ये काले स्नानतुलादानादे
र्विधानात् ॥ दर्शनविच्छेदे दत्तमपि स्नानादिनयत्नत्वनिमित्तस्याचतुः ॥ नान्यः ॥ ज्ञानपक्षे
व्यपदोषस्तुल्यइतिचेत् ॥ सर्वोसि ॥ यदि ज्ञानवाचकं पदमश्रूयतै तत स्तस्यास्तयोर्विंध्या
र्थेत ॥ दृशिस्तु श्रूयत इति ॥ वैषम्यात् ॥ तथ्यं नहि ज्ञानं तु श्रूयते ॥ संक्रांतौ स्नायादित्युच्यते
दर्थोदिसेवहि ॥ अस्मात्वादेवनोद्देश्यविशेषणविवक्षाकृतवाक्यभेदोपि प्रसक्तः ॥ नहि दृष्ट्य
हणनिमित्तमिति चेत् ॥ यस्तास्तेस्तोतरं स्नापत्तेः ॥ तयाक्त्याविशिष्टोद्देशे वाक्यभेदा
च्च ॥ ननापयनतुल्यमिति चेत् ॥ यावद्दर्शनगोचरत्व इति वचनेनतन्निषेधात् ॥ तर्हि दर्श
न्नानेनिवचनानित्यस्तास्तविषयतयानुवृत्त्य यह इवयस्तास्तेपिस्युः ॥ न च तर्हि चद
र्शनस्य विधिरनुवादो वा ॥ अद्यग्रहणोद्देशे दर्शविधित्वद्दर्शनविशिष्टस्नानविधि
द्देशेन दर्शन विधिः ॥ नद्य ॥ ग्रहोद्देशेन स्नानविधाने दर्शनविधानेन वाक्यभेदात् ॥ एते
नेद्वितीयोपि परास्तः ॥ नतृतीयः ॥ स्नानस्यग्रहोदर्शनस्यानिमित्तत्वेन विधेयत्वाच्च ॥ अन्य
था सौमवचनादोषप्रसंजनाविधिः केननार्येत ॥ अयनावाक्ये शुद्धत्वेऽपि दर्शनमात्तिः ॥ तस्मा
च्च निमित्ते सति स्नाननिमित्तस्यौन्यास्त्र यात् ॥ एवं दर्शनविधौ स्तुतिं तन्निमित्तकस्नान

(सेतौ) प्रथम...

लादिसमुत्पन्ने सुहेलोकभयंकरे॥ पाषाणं देमयादत्तमाहार्घ्यं कल्पनामिति पाषाणं प्रक्षि
प्य॥ विश्वाची च घृताची च विश्वयोने विश्वसांपते॥ सांनिध्यं कुरु मे देव सागरे लवणांभ
सि॥ नमस्ते विश्वगुप्ताय नमो विष्णो अपांपते॥ नमो जलधिरूपाय नदीनां पतये नमः॥
समस्तजगदाधार शंखचक्रगदाधर॥ देवदेव हि ममाज्ञां तव तीर्थनिषेवणे॥ त्रित
लोक कमा शानन मोनि छुतु माप्तितम्॥ सांनिध्यं कुरु मे देवश सागरे लवणांभसि॥
अग्निश्च योनिरनिलश्च देहो रेतो धाता विष्णोरमृतस्य नाभिः॥ एतद्ब्रुवन्पांडव सत्यवाक्यं
ततो वगाहेत पतिं नदीनामिति प्रार्थ्य तोकेश्व॥ मंत्रान्पठित्वा विधिवत्स्नात्वा सर्वरत्न
भरां तु सीमानं सर्वरत्नाकरोयतः॥ सर्वरत्नप्रधानस्त्वं गृहाणार्घ्यं महोदधे॥ इत्य
र्घ्यं॥ दत्वा लपयेत्॥ ॥ यथोक्तं पृथ्वीखंडे दर्देस्कांदे॥ ॥ पिप्पलादं विरूपं च
तं तांत्रजी वकेश्वं॥ वसिष्ठं वामदेवं च पराशरमुमापतिम्॥ वाल्मिकिं नारदं चैव बाल
खिल्यांस्तथैव च॥ नलं नीलं च गवाक्षं च गवयं गंधमादनम्॥ जांबवंतं हनुमंतं सुग्री
वं चांगदं तथा॥ मैंदं च द्विविदं चैव वृषभं शरभं तथा॥ रामं च लक्ष्मणं चैव सीतां चैव य
शस्विनाम्॥ एतान्स्मृत्वा पयेद्विद्वान् जलमध्ये विशेषतः॥ आब्रह्मस्तंबपर्यंतं यत्किंचित्सच
राचरम्॥ मया दत्तेन तोयेन तृप्तिमेवाभिगच्छतु॥ ॥ ७॥ इति निमां सकलामयनामष्ट
कुल राम रघुभद्राल जदिनकरस्य हानुजकमस्काकरमद्दूस्तेनिर्णयसिंधौ यस्य

रिच्छेदः समाप्तः॥ ॥ ॥ ४२ ॥ शाके १६६१ विकारिनामसंवत्सरे उत्तरायणेश
स्त्रास्ततौ पौषवद्ये एकादश्यां ११ गुरुवासरे इदं पुस्तकं कविश्वरोपनामक माहादभट्टस्य
सुतेन गोपाळभट्टकविश्वरेण लिखितम् ॥ ॥ आत्मार्थं परोपकारार्थं ॥ श्री सच
गोपाळ सर्वांतरात्मा जगदीशार्पणमस्तु ॥ श्री जगदंबार्पणमस्तु ॥ ७ ॥ ७ ॥



[OrderDescription]
,CREATED=18.06.20 13:31
,TRANSFERRED=2020/06/18 at 13:47:34
,PAGES=85
,TYPE=STD
,NAME=S0003172
,Book Name=M-2912-MINMASA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,